ॐ

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला – द्वादश पुष्प

वास्तुशास्त्रविमर्श

सन्दर्भित एव मूल्याङ्कित शोधपत्रिका



श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

(केन्द्रीयविश्वविद्यालयः)

नवदेहली-110016

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला-द्वादश पुष्प

वास्तुशास्त्रविमर्श

सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका
(विश्वविद्यालय अनुदान आयोग के केयर लिस्ट में सम्मिलित)

प्रधान सम्पादक
प्रो. मुरलीमनोहर पाठक
कुलपति

सम्पादक
डॉ. अशोक थपलियाल
सहाचार्य एवं अध्यक्ष

वास्तुशास्त्र विभाग
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय
(केन्द्रीय विश्वविद्यालय)
नव देहली-110016

प्रकाशक -
वास्तुशास्त्र विभाग
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय
(केन्द्रीय विश्वविद्यालय)
कुतुब सांस्थानिक क्षेत्र, नव देहली-110016
ISSN :- 0976-4321

© प्रकाशक

संस्करण - 2019
मुद्रण वर्ष - 2021

मूल्य 200/-

प्रकाशक की लिखित पूर्वानुमति के बिना इस ग्रन्थ के किसी भी अंश का अनुवाद या किसी भी रूप में उपयोग करना सर्वथा वर्जित है।

मुद्रक:
गणेश प्रिंटिग प्रेस
दिल्ली-110016
फोन : 9811663391/93

पुरो वाक्

भारतीय वास्तुशास्त्र में भवनादि विभिन्न निर्मितियों के सिद्धान्तों व नियमों का सुविस्तृत प्रतिपादन मिलता है, जिससे उनमें निवास करने वाला मनुष्य सुख-सुविधा, सुरक्षा आदि अनेक मानकों की प्राप्ति के साथ ही मानसिक सन्तुष्टि, प्रसन्नता एवं शान्ति का अनुभव कर सके। भारतीय मनीषा ने वास्तु के न केवल भौतिक पक्ष पर, अपितु आध्यात्मिक पक्ष पर भी अपना ध्यान केन्द्रित किया है। इसी कारण वास्तुनिर्मिति के पूर्व एवं पश्चात् प्राचीन समय से ही आचार्यों ने वास्तुपुरुष एवं तत्सम्बन्धित देवताओं की अर्चना का विधान किया है। हमारे ऋषि-मुनियों एवं आचार्यों ने पृथिवी पर स्थित गतिशील ऊर्जा शक्तियों की चैतन्यप्रवाह के रूप में अभ्यर्थना की है। वेदकाल में जहाँ वास्तोष्पति[१] के रूप में वास्तु के अधिष्ठाता की गृहादि की समृद्धि हेतु उपासना की गई है, वहीं पुराणकाल में वास्तुपुरुष की परिकल्पना में तदधिष्ठित देवताओं की भी समर्चना प्राप्त होती है। यह वास्तुपुरुष कौन है? कहाँ से आया? इसकी पूजा क्यों की जाती है? इन सब प्रश्नों का उत्तर वास्तुपुरुषोत्पत्ति की कथानकों में प्राप्त होता है। मत्स्यपुराण[२], अग्निपुराण[३], विष्णुधर्मोत्तरपुराण[४], बृहत्संहिता[५] आदि ग्रन्थों में अन्धकासुर के साथ युद्ध करते हुए भगवान शिव के ललाट से गिरने वाले स्वेदबिन्दु से वास्तुपुरुष की उत्पत्ति मानी गयी है। वास्तुपुरुष की उत्पत्ति का यह कथानक सृष्ट्युत्पत्ति सिद्धान्त से साम्य रखता है। अन्धकासुर को आज के विज्ञान द्वारा कथित डार्क मैटर के रूप में माना जाय तो भगवान शिव ऊर्जा अर्थात् एनर्जी के प्रचण्ड स्रोत कहे जा सकते हैं। इन दोनों के संघर्ष से ही सृष्टिरूपी वास्तु उत्पन्न हुआ। ईशानशिवगुरुदेवपद्धति[६], शिल्परत्न[७] अपराजितपृच्छा[८], वास्तुविद्या[९] प्रभृति ग्रन्थों में वास्तुपुरुष की उत्पत्ति देवशक्ति

---

1. वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः।
   यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।। - ऋग्वेद -7/54/3
2. मत्स्यपुराण अध्याय 252
3. अग्निपुराण 40/1
4. विष्णुधर्मोत्तरपुराण 3/95
5. बृहत्संहिता 53/2-3
6. ईशानशिवगुरुदेवपद्धति 3/26
7. शिल्परत्न 7/4-29
8. अपराजितपृच्छा 53 सूत्र
9. वास्तुविद्या 4 अध्याय

से पराजित दैत्यों की पराजय का प्रतिशोध लेने हेतु क्रोधित दैत्यगुरु शुक्राचार्य के यज्ञ से कही गई है। मेरुतन्त्र[1] नामक ग्रन्थ में वास्तुपुरुष की उत्पत्ति के सन्दर्भ में भिन्न प्रकार की कथा भी प्राप्त होती है। इस कथानक के अनुसार वास्तु नामक असुर ने तीनों लोकों को जीतकर प्रजापति का गौरवशाली पद हस्तंगत कर लिया–

वास्तुनामा पुरा कश्चिद्बभूव त्वसुरोत्तमः।
त्रैलोक्यं निर्जितं तेन त्रिपञ्चाशच्च देवताः।
ये रणे सम्मुखे यातास्तेन तेऽतिनिपीडिताः।
पुनः पुनर्जिता युद्धे स एवासीत्प्रजापतिः॥[2]

तब नारदमुनि ने अपने चातुर्य से उसे भगवान् विष्णु से युद्ध करने हेतु प्रेरित किया। भगवान विष्णु एवं उस असुर के मध्य हुए भयंकर युद्ध से समस्त विश्व कम्पन करने लगा। तब भगवान विष्णु ने उसे अपनी मायाशक्ति से विमोहित कर दिया। फलस्वरूप भगवान विष्णु को उसने इच्छित वर मांगने को कहा। भगवान विष्णु ने उससे उसकी ही मृत्यु का वरदान माँग लिया। अपने वरदान देने के वचन की पूर्ति के लिए वह अपने प्राण अर्पण करने हेतु उद्यत हुआ। उसी समय अशरीरी वाक् के उद्घोष से उस वास्तुनामक असुर को नूतन गृहादि निर्माण काल में पूज्य देवत्व पद प्राप्त हुआ–

काले तस्मिंश्च भो देवा वागुवाचाशरीरिणी।
दैत्येन्द्र कुरु मा शोकं भुवो जन्म तवाभवत्।
तत्रैव त्वं लयं याहि त्वत्तो पार्थे वरं शृणु।
ये वर्णाः स्वस्य भोगार्थे करिष्यन्ति नवं गृहम्।
तत्र त्वदुत्सवमृते नाना दुःखैरुपद्रुताः।
कालकर्ण्यादिका दास्यो विनायकमुखाश्च ते।
सेवकाः पीडयिष्यन्ति चेत्याज्ञा पारमेश्वरी।
इत्याकर्ण्य वचसोऽपि गर्तं कृत्वा महाबिलम्॥[3]

इस प्रकार उस वास्तु नामक असुर का शरीर भूमि के अन्दर एक गर्त बनाकर उसमें प्रविष्ट हो गया। देवों ने उस गर्त को मिट्टी एवं पत्थरों से भर दिया। पुनः वह उस गर्त से बाहर न आ सके, इस भय से आशंकित होकर देवता उसके ऊपर आरूढ हो गये। इस प्रकार वास्तु नामक असुर देवत्व को प्राप्त होकर त्रिपञ्चाशत् (53) देवताओं के साथ वास्तुमण्डल का अधिष्ठातृदेव बन गया।

---

1. मेरुतन्त्र 3/143–167
2. मेरुतन्त्र 3/143–144
3. मेरुतन्त्र 3/156–169

उपर्युक्त कथानक वास्तु नामक असुर के भौतिकवादी विस्तार की अतिवादी प्रवृत्ति को द्योतित करता है। फलतः आधिदैविक शक्ति विष्णु से उसका टकराव होता है। अतिभौतिकता के कारण वह माया से प्रभावित होकर स्वयं को जगत्प्रभु समझने लगता है। इस कारण वह जब विष्णु से वर मांगने को कहता है तो वे उसकी अतिभौतिकता की मृत्यु का वरदान मांगते हैं। तब उसकी आध्यात्मिक भावना जागृत होती है। तब भौतिकता को त्यागकर वह देवत्व को प्राप्त होता है। उसके भौतिक अवयवों पर देवशक्ति का नियन्त्रण उसे पुनः भौतिकवादी प्रवृतिसम्पन्न नहीं होने देती। इसी उदात्त भावना से इस कथानक को आचार्य ने कहा है। वस्तुतः जब तक भौतिकवादी प्रवृत्तियों पर आध्यात्मिक शक्तियों का नियन्त्रण न हो तो वे संसार के विनाश का कारण भी बन सकती हैं।

इस प्रकार से वेद, वेदाङ्ग, पुराण, आगम, तन्त्रादि ग्रन्थों में वास्तुविषयक चिन्तनधारा सततरूप से प्रवहमाना परिलक्षित होती है। अति प्राचीन काल से ही भारत में वास्तुशास्त्र के अध्ययन एवं अध्यापन के साथ ही उसके अनुपालन की भी सुदृढ़ परम्परा रही है। इसी परम्परा को निरन्तर बढ़ाने के सदुद्देश्य से विद्यापीठ में वास्तुशास्त्र विभाग की स्थापना हुई है। इसी नैरन्तर्यता में विभाग द्वारा 'वास्तुशास्त्रविमर्श' नामक शोधपत्रिका का सततरूप से प्रकाशन होता आ रहा है, जिसमें विद्वानों के उत्कृष्ट शोधलेखों का प्रकाशन किया जाता है। इसी क्रम में वास्तुशास्त्रविमर्श के इस द्वादश पुष्प को सुधीजनों को अर्पित करते हुए मैं अत्यन्त हर्ष का अनुभव कर रहा हूँ। शमिति।

मार्गशीर्ष शुक्ल 12, वि. सं. 2078 **प्रो. मुरलीमनोहर पाठक**
दिनांक 15.12.2021 ई. कुलपति

सम्पादकीय

अति प्राचीनकाल से ही हमारे भारतीय जनजीवन में देवतातत्त्व का महत्वपूर्ण स्थान रहा है। हमारा प्रत्येक कार्य बिना देवतत्त्व के पूरा ही नहीं होता। कोई कार्य प्रारम्भ करना हो तो उसे भी 'कार्य का श्रीगणेश कीजिए' इस प्रकार से कहा जाता है। इसी कारण भारतीय ज्ञान-विज्ञान परम्परा का प्रत्येक शास्त्र देवतत्त्व से अनुप्राणित है। ज्योतिषशास्त्र में नवग्रहदेवता, व्याकरणशास्त्र में महेश्वर, वास्तुशास्त्र में वास्तोष्पति, आयुर्वेद में धन्वन्तरि, नृत्यकला में नटराज शिव, चित्र व आलेखन में जगन्नाथ का पट्टचित्र इत्यादि इसके प्रत्यक्ष उदाहरण हैं। देवतत्त्व का महत्व व उपयोगिता न केवल हमारे ज्ञान-विज्ञान व दर्शन के क्षेत्र में है अपितु भारतीय लौकिक जीवन के विविध क्षेत्रों में भी परिलक्षित होता है। वस्तुतः हमारे जीवन में जन्म से लेकर मृत्यु पर्यन्त प्रत्येक कार्य और संस्कार देवतत्त्व से अनुप्राणित हुए बिना पूर्ण ही नहीं होते हैं। स्वतः जिज्ञासा जाग्रत होती है कि यह देवता तत्त्व क्या है? इस विषय में वेद से लेकर उपनिषद, पुराण आदि साहित्य में सुदृढ़ चिन्तन परम्परा प्राप्त होती है। इस सन्दर्भ में वेद कहता है कि सभी के अन्तःकरण में विराजमान परमदेव की अज्ञानता के कारण अनुभूति नहीं होती है -

न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव।
नीहारेण प्रावृता जल्प्या चासृतृप उक्थशासश्चरन्ति॥[1]

वैदिक ऋषि अपने अपरिपक्व ज्ञान को स्वीकार करते हुए उस देव के परम धाम की जिज्ञासा करते हुए कहता है कि -

पाकः पृच्छामि मनसा विजानन्, देवानामनेना निहिता पदानि॥[2]

तब देवता तत्त्व का चिन्तन करते हुए वैदिक ऋषि अपने हृदय के उद्गार को इस प्रकार अभिव्यक्त करता है-

यो नः पिता जनिता यो विधाता, धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव, तं संप्रश्नं भुवना यन्त्यन्या॥[3]

यही चिन्तन बीज उपनिपदों में पल्लवित और पुष्पित होकर अनेक दर्शनरूपी शाखाओं से युक्त सुदृढ़ ज्ञानवृक्ष के रूप में विकसित हुआ है। भारतीय दर्शनों में वैविध्य का कारण

---

1. ऋग्वेद 10/82/7
2. ऋग्वेद 1/164/5
3. ऋग्वेद 10/82/3

भी देवतत्त्व का चिन्तन ही है–

दर्शनानि षडेवात्र मूलभेदव्यपेक्षया।
देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः।।[1]

भारतीय वास्तुशास्त्र भी दार्शनिक चिन्तन बिन्दु से निकला हुआ विज्ञान है। इसमें वास्तुपुरुष एवं उसके ऊपर अधिष्ठित देवताओं का समर्चन भौतिकवादी आसुरी कला को अध्यात्मशक्ति द्वारा नियन्त्रित करने का प्रतीक है। वेदों में वास्तु का अधिष्ठाता वास्तोष्पति के नाम से पूजित है। यही देवता सम्भवतः पुराण काल में आसुरी शक्ति का प्रतीक वास्तुपुरुष के नाम से सुविख्यात हुआ। जिस पर देवशक्ति का नियन्त्रण हुआ। देवशक्तियां वास्तुपुरुष के सभी अंगों में प्रतिष्ठित हुई। यह तथ्य एकेश्वरवाद से बहुदेववाद की प्रवृत्ति को आभासित करता है। वेदों में भी एक देव से अनेक देवताओं की प्रवृत्ति कही गई है। यथा –

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्राः बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।।[2]

सम्भवतः वेद में वर्णित इसी बहुदेववाद के चिन्तन को वास्तुशास्त्र के महनीय आचार्यों ने वास्तुपदविन्यास में स्थान प्रदान किया है। सामान्यरूप से वास्तुपदविन्यास की प्रक्रिया में वास्तुनिर्माणयोजना से पूर्व ही निर्धारित क्षेत्र में वास्तुपुरुष की स्थापना की जाती है। वास्तुपुरुष का शिर ईशानकोण में, दोनों चरण नैर्ऋत्यकोण में (पितृपद में) तथा अन्य अंगों में अन्य देवता स्थित हैं। यह स्थिति भूमि में अधोमुख परिकल्पित की है।[3] इस प्रकार सम्पूर्ण भूभाग को वर्गों में विभक्त किया जाता है। प्रत्येक वर्ग को वास्तुपद कहते हैं। वास्तु की प्रकृति के अनुरूप ये 1वर्ग से लेकर 1024 वर्गों तक 32 प्रकार के होते हैं।[4] जिनमें 64, 81 एवं 100 पदवास्तु भेद प्रमुख हैं। वास्तुराजबल्लभ में कार्य की प्रवृत्ति के अनुसार वास्तुपद प्रयोग करने का वर्णन है–

गुणो भूपतिमन्दिरे च नगरे पूज्यश्चतुष्षष्टिकै-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाब्ध्यंशकैः।
प्रासादे तु शतांशकैस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते वाप्यां तडागे वने।।[5]

इन वास्तुपदों में देवताओं का स्थान विभिन्न ग्रन्थों में अलग–अलग प्रकार से मिलता है। साथ ही देवताओं के नाम में भी परस्पर भिन्नता दिखाई देती है। इसका मुख्य कारण

---

1. षड्दर्शनसमुच्चय का. 2
2. ऋग्वेद 1/164/46
3. बृहत्संहिता वास्तुविद्या.51–54
4. मयमतम् 7/1–21
5. वास्तुराजबल्लभ 2/4

देश व सम्प्रदाय की भक्ति के अनुसार वास्तुकला के सिद्धान्तों का निर्माण होना है। फिर भी संकल्पना एवं तात्विक दृष्टि से देवतत्त्व की अवधारणा प्रायः एक जैसी ही है। वास्तुपदविन्यास में देवनिवेशन कर उनकी प्रकृति व गुणधर्मिता के अनुसार निर्माणकार्य किया जाता है। इस सम्बन्ध में मयमतम्[1], वास्तुमण्डन[2], अपराजितपृच्छा[3] आदि ग्रन्थों में विस्तार से चर्चा प्राप्त होती है। इन देवों में सबसे महत्वपूर्ण ब्रह्मा जी हैं, जो वास्तुपदविन्यास में सबसे अधिक पदों के अधिष्ठाता हैं। वास्तुशास्त्र के मानक ग्रन्थों के अनुसार गृहवास्तु में प्रमुखतया प्रयुक्त होने वाले एकाशीतिपदवास्तु में नवम भाग के ये एकमात्र अधिकारी देव हैं, परन्तु वैखानसागम में केवल मध्य का एक ही पद ब्रह्मा का कहा गया है। उसके बाहर आठों पदों में पूर्व से लेकर ईशान पर्यन्त क्रमशः भृगु, अंगिरा, अत्रि, पुलह, पुलस्त्य, क्रतु, मरीचि एवं वसिष्ठ का स्थान कहा गया है।[4] इसी प्रकार मयमतम् में ब्रह्मा को शिव कहा गया है –

ब्रह्मा मध्ये स्थितः शम्भुस्तन्मुखस्थाश्चतुः सुराः।।[5]

वास्तुमध्य में ब्रह्मस्थान के महत्व के विषय में कहा गया है कि–

सुखमिच्छन्ब्रह्माणं यत्नाद्रक्षेद् गृही गृहान्तःस्थम्।
उच्छिष्टादुपघातात् गृहपतिरुपतप्यते तस्मिन्।।[6]

ब्रह्मा सृष्टिकर्ता हैं। इन्द्रादि सभी देव उनसे ही निर्गत हुए हैं। इसलिए वास्तुपदविन्यास में सबसे मध्य वे स्थित हैं। उनका स्थान पवित्र रहे, एतदर्थ वहाँ पर आंगननिर्माण का आदेश वास्तुशास्त्र के आचार्य देते हैं। इस आंगन में भी केवल तुलसी रोपण ही सुखद कहा गया है।[7] चाहे स्वर्णवृक्ष भी क्यों न हों? अन्य वृक्षों का रोपण आंगन में निषिद्ध है।[8]

इस प्रकार देश, काल एवं परिस्थिति के अनुसार वास्तुशास्त्र के सिद्धान्तों में कुछ परिवर्तन तो हो जाता है परन्तु इसकी मूलसंकल्पना अप्रभावित रहती है। वास्तुशास्त्र स्थापत्यवेद के रूप में अथर्ववेद के उपवेदत्व[9] के कारण वेद के 'इष्टप्राप्ति एवं अनिष्ट

---

1. द्रष्टव्यम् मयमतम् अध्याय 29
2. द्रष्टव्यम् वास्तुमण्डन अध्याय 05
3. द्रष्टव्यम् अपराजितपृच्छा अध्याय 76
4. वैखानसागम कश्यपज्ञानकाण्ड अध्याय 18
5. मयमतम् 7/40
6. उद्धृतं वास्तुसारः वास्तुविन्याप्रकरणम्, पृ.सं. 58, श्लोक 65
7. गृहरत्नविभूषण पृ. 94, श्लोक 139
8. वास्तुसौख्यम् श्लोक 40
9. वेदशाखापर्यायलोचनम् कात्यायनकृतश्च संस्कृतव्याख्यया समलंकृतः चरणव्यूहः पृष्ठम्–71, चौखम्भा विद्याभवन वाराणसी, संस्करण–2001

के परिहार का अलौकिक उपाय कथन'[1] के सदुद्देश्य की पूर्ति हेतु प्रयत्नशील रहता है। वास्तुशास्त्र में वर्णित सिद्धान्तों एवं नियमों को जाने बिना वेद के उद्देश्य की पूर्ति नहीं हो सकती है। अतः वास्तुशास्त्र का अध्ययन न केवल भौतिक वास्तुनिर्मिति के सिद्धान्तों को जानने हेतु होना चाहिए अपितु इसके अन्तःकरण में विद्यमान आध्यात्मिक तत्त्व को भी समझना आवश्यक है। अतः संस्कृत भाषा में निबद्ध वास्तुज्ञान के शास्त्रीय स्वरूप के अध्ययन-अध्यापन की दृष्टि से श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ (मानित विश्वविद्यालय), नई दिल्ली का वास्तुशास्त्र विभाग निरन्तर क्रियाशील है। इसी दृष्टि से विद्वज्जनों के शोधनिबन्धों से समलंकृत वास्तुशास्त्रविमर्श का प्रकाशन विभाग द्वारा विगत कई वर्षों से किया जा रहा है।

इस वास्तुशास्त्रविमर्श के द्वादशपुष्प के प्रकाशन के शुभावसर पर मैं सर्वप्रथम संस्कृत एवं संस्कृति के संरक्षक हमारे यशस्वी कुलपति महोदय परम श्रद्धेय प्रो. मुरलीमनोहर पाठक जी को सादर नमन करता हूँ जिनके सन्निर्देशन एवं संरक्षकत्व में वास्तुशास्त्रविमर्श का यह पुष्प सुधी पाठकों के करकमलों में समर्पित हो रहा है। इस पावनवेला में मैं उत्तराखण्ड संस्कृत विश्वविद्यालय, हरिद्वार के माननीय कुलपति एवं वास्तुशास्त्र विभाग के संस्थापक विभागाध्यक्ष परम पूजनीय गुरुवर्य प्रो. देवीप्रसाद त्रिपाठी जी के चरणकमलों में सादर प्रणामांजलि निवेदित करता हूँ, जिनके कुशल नेतृत्व में विभाग पुष्पित हुआ। इनका सत्परामर्श एवं मार्गनिर्देशन हमें नित्य सारस्वत साधना हेतु अभिप्रेरित करता है। इसी क्रम में पूर्व कुलपति प्रो. रमेश कुमार पाण्डेय जी के चरणों में सादर प्रणाम करता हूँ। जिनकी सत्प्रेरणा एवं निर्देशन हमें प्रचोदित करता है। इसी सन्दर्भ में शोध एवं प्रकाशन समिति के सभी सदस्यों को हार्दिक धन्यवाद प्रदान करता हूँ, जिनके सहयोग एवं परामर्श से वास्तुशास्त्रविमर्श का यह द्वादशपुष्प प्रकाशित हो सका। मुद्रणकार्य हेतु गणेश प्रिंटिंग प्रेस एवं अन्य सभी सहयोगी सुहृज्जनों का हार्दिक आभार प्रकट करता हूँ। शमिति।

डॉ. अशोक थपलियाल
अध्यक्ष- वास्तुशास्त्र विभाग

---

1. इष्टप्राप्तिरनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः। - सायणाचार्य, वेदभाष्यभूमिकासंग्रहः, तैत्तिरीयभाष्यसंहिता -सम्पादक बलदेव उपाध्याय -पृ.सं. 02

शोध एवं प्रकाशन समिति

१. डॉ. अशोक थपलियाल, वास्तुशास्त्र विभागाध्यक्ष	अध्यक्ष
२. डॉ. रश्मि चतुर्वेदी	सदस्य
३. डॉ. देशबन्धु	सदस्य
४. डॉ. प्रवेश व्यास	सदस्य
५. डॉ. योगेन्द्र कुमार शर्मा	सदस्य
६. डॉ. दीपक वशिष्ठ	सदस्य

विषयानुक्रमणिका

1. वृक्षायुर्वेदे वराहमिहिरस्यावदानम् — **डॉ. सुशीलकुमारः,** 1–7
सहाचार्यः ज्योतिषविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

श्रीखेमराजरेग्मी
शोधच्छात्रः ज्योतिषविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

2. वैदिकवाङ्मये वास्तुनिदर्शनम् — **डॉ. हनुमानमिश्रः** 8–12
सहाचार्यः, वेदविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

3. वास्तुशास्त्रदृशा जम्बूद्वीपविमर्शः — **डॉ.अशोकथपलियालः** 13–21
सहाचार्यः, वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

गोविन्दवल्लभः
शोधच्छात्रः, वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

4. जयसिंहनिर्मापितस्य जयपुरनगरस्य वास्तुशास्त्रीयाध्ययनम् — **डॉ. प्रवेशव्यासः** 22–28
सहायकाचार्यः, वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

श्रीकृष्णचन्द्रशर्मा
शोधच्छात्रः, वास्तुशास्त्रविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–१६

5.	भारतीयवास्तुशास्त्रे भूमिपरीक्षणस्य वैज्ञानिकत्वम्	**डॉ. मृत्युञ्जयकुमारतिवारी** सहायकाचार्योऽध्यक्षश्च, ज्योतिषविभागः श्रीकल्लाजीवैदिकविद्यालयः, कल्याणलोकः, निम्बाहेडा, चित्तौडगढ़म् (राजस्थानम्)	29–32
6.	पुराणेषु वास्तुशास्त्रस्वरूपम्	**कन्हैयाकुमारझाः** पूर्वशोधच्छात्रः वास्तुशास्त्रविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली–१६	33–39
7.	वास्तुशास्त्रे द्वारविधानम्	**मधुसूदनशर्मा** शोधच्छात्रः वेदविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली–१६	40–44
8.	वास्तुशास्त्रदृष्ट्या द्वारस्थापनविचारः	**विजयप्रसादरतूड़ी** शोधच्छात्रः वास्तुशास्त्रविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली–१६	45–53
9.	वास्तुशास्त्र में वृक्षविन्यास	**प्रो. रामचन्द्र पाण्डेय** अध्यक्षचर, संस्कृत विद्या धर्मविज्ञानसंकाय काशी हिन्दू विश्वविद्यालय वाराणसी–उ. प्र.	54–60
10.	वास्तु–मुहूर्त विमर्श	**प्रो. ओंकार नाथ चतुर्वेदी** अध्यक्षचर, ज्योतिषविभाग श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठ नई दिल्ली–१६	61–72
11.	वास्तुपद विन्यास में वर्णित विविध पद देवताओं की प्रकृति, स्वरूप एवम् लक्षण	**प्रो. वासुदेव शर्मा** प्रभारी प्राचार्य राष्ट्रिय संस्कृत संस्थान श्री रणवीर परिसर, जम्मू	73–94

12.	द्वार, गवाक्ष, वरामदा एवं आँगन का विचार (भारतीय वास्तुशास्त्र के परिप्रेक्ष्य में)	**प्रो. हंसधर झा** अध्यक्ष- ज्योतिष विभाग राष्ट्रिय संस्कृत संस्थान, भोपाल परिसर, भोपाल	95-111
13.	श्रौतवेदी के निर्माण में वास्तुसिद्धान्त	**विद्यावाचस्पति** **डॉ.सुन्दरनारायणझा** सहाचार्य, वेदविभाग, श्री ला.ब.शा.रा.सं.विद्यापीठ, न.दिल्ली-16	112-118
14.	वास्तुशास्त्र में भूपरिग्रह विचार	**डॉ. रश्मि चतुर्वेदी** सहाचार्या (ज्योतिष विभाग) श्री ला.ब.शा.रा.सं.विद्यापीठ, न.दिल्ली-16	119-131
15.	शिल्पाशास्त्र में रसानुप्रयोग	**डॉ. मोहिनी अरोड़ा** सहायक-आचार्या, साहित्यविभाग राष्ट्रिय संस्कृत संस्थान, भोपाल परिसर, भोपाल	132-137
16.	लक्ष्मीनारायण मन्दिर दिल्ली का वास्तुशास्त्रीय दृष्टिकोण से अध्ययन	**डॉ.देशबन्धु** सहायक-आचार्य, वास्तुशास्त्रविभाग, लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ,नई दिल्ली-16 **प्रिया कौशिक** शोध-छात्रा, वास्तुशास्त्रविभाग, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय,नई दिल्ली-16	138-154
17.	देवालय और उनके शिखर विधान	**डॉ. श्रीकृष्ण 'जुगनू'** वास्तुशास्त्रविद, विश्वाधारम्, 40 राजश्री कॉलोनी विनायक नगर उदयपुर-313001 राजस्थान	155-166

18. शिक्षण विधियों में नवाचार : वास्तुशास्त्र के सन्दर्भ में — **डॉ ज्ञानेन्द्र कुमार** 166–174
असिस्टैंट प्रोफेसर, शिक्षा संकाय
दिल्ली विश्वविद्यालय, दिल्ली

19. प्रासाद निर्माण में शिखर विधान — **डॉ. ब्रह्मानन्द मिश्रा** 175–181
सहायकाचार्य ज्योतिष विभाग
राष्ट्रिय संस्कृत संस्थान, एकलव्यपरिसर,
अगरतला, त्रिपुरा।

20. गृह वास्तु में मुख्य द्वार विचार — **डॉ. सुरेश शर्मा** 182–187
ज्योतिष विभाग, राष्ट्रिय संस्कृत संस्थान,
श्री रघुनाथ कीर्ति परिसर, देवप्रयाग,
उत्तराखण्ड।

21. वास्तुशास्त्र में स्थपत्यादि विवेचन — **कान्ताप्रसाद** 188–194
शोधच्छात्र संस्कृत विभाग,
हेमवतीनन्दन बहुगुणा गढ़वाल विश्वविद्यालय
(केन्द्रीय-विश्वविद्यालय)
श्रीनगर गढ़वाल, उत्तराखण्ड

वृक्षायुर्वेदे वराहमिहिरस्यावदानम्

डॉ. सुशीलकुमारः
श्रीखेमराजरेग्मी

वैदिककालादेव वृक्षाणां महत्त्वं संरक्षण-संवर्द्धनयोश्च परम्परा प्रचलितास्ति, प्राचीनकाले आधुनिककाले वा यदा पश्यामः तर्हि अस्य विश्लेषणं यत्र कुत्रापि प्राप्यते एव। तद्यथा कृषिपाराशरः, काश्यपीयकृषिसूक्तः, गार्गीयसंहिता, घाघभड्डरी, मेघमाला, वनमाला, कादम्बिनी, मयूरचित्रकम् इत्यादिषु ग्रन्थेषु कस्मिन् स्वल्पं तु कस्मिन्नधिकमात्रायां वृक्षाणां सन्दर्भे ज्ञानं प्राप्यते, किन्तु त्रिस्कन्धमर्मज्ञाचार्यवराहमिहिरेण स्व-बृहत्संहितायां वृक्षायुर्वेदाध्याये अस्मिन् विषये विस्तृतरूपेण प्रतिपादितः।

उद्यानस्य सार्थकता, भूमेः शोधनम्, उद्याने रोपणयोग्या वृक्षाः, वृक्षरोपणस्य कालः (ऋतुः), वृक्षरोपणस्य नक्षत्रम् (मुहूर्तः), वृक्षरोपणस्य नियमा विधयो वा, वृक्षसेचनस्य प्रकारः, वृक्षेभ्यः धनप्राप्तेः परिज्ञानम्, काण्ड (कलमी) रोपणस्य विधानम्, फलयुक्तपादपानां रोपणम्, वृक्षेषु रोगोत्पत्तेः कारणम्, वृक्षाणां चिकित्सा च इत्यादिकानां विषयाणां तत्र सविस्तरेण प्रतिपादनं वर्तते।[1]

वृक्षस्वरूपम्-

सर्वप्रकारकाः वनस्थवृक्षाः, लताः, पुष्पाणि, वनौषधयः यज्ञीयवृक्षाश्च वनस्पतिजगतः विषयाः सन्ति। वस्तुतः येषु पुष्पाणि न विकसन्ति परन्तु फलानि फलन्ति ते वनस्पतयः कथ्यन्ते, यथा- अश्वत्थ- बिल्ववृक्षादयः। उक्तञ्च-

अपुष्पा फलवन्तो ये ते वनस्पतयः स्मृताः।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः।।[2]

आयुर्वेदग्रन्थः 'भावप्रकाशः' अनुसारेण नन्दीवृक्षः, अश्वत्थः, प्ररोहः, गजपादपः, स्थालीवृक्षः, क्षयतरुः, क्षीरवृक्षश्च वनस्पतेः श्रेण्याम् आयान्ति।[3]

---

1. वराहमिहिरकृत-बृहत्संहिता, वृक्षायुर्वेदाध्यायः (५५)
2. मनुस्मृतिः, प्रथमाध्यायः, श्लो.१
3. नन्दीवृक्षो अश्वत्थभेदो प्ररोहो गजपादपः।
   स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद् वनस्पतिः।। भावप्रकाशः, प्रथमाध्यायः, श्लो.१

मेदिनीकोषानुसारेण पृथिव्यामुत्पन्नं वृक्षमात्रं वनस्पतेः श्रेण्यां परिगण्यते।[1] पृथिव्यामुत्पन्नानि वृक्षमात्राणि पुष्पाणि पादपाः पत्राणि फलानि चैतेषाम् उत्पत्तेः, विकासस्य, लयस्य च ज्ञानं, वृक्ष-लता-धान्यादीनां बीजानां गुणधर्मज्ञानम् ऋतूनां ज्ञानं च वनस्पतिशास्त्रस्य विषयाः सन्ति।[2]

उद्यानस्य सार्थकता-

वृक्षायुर्वेदाध्यायस्य प्रारम्भे एव आचार्यवराहमिहिरेण कथ्यते यद् वापी-कूप-तडाग-जलाशयादीनां तीरे उद्यानं निर्मातव्यम्, यतो जलयुक्तस्थलं यदि छायारहितं तदा न शोभते इति।[3]

उद्यानहेतोः भूमि-शोधनं चयनं वा-

उद्यानस्य स्थापना हेतोः कोमला भूमिः शोभना भवति। यस्यां भूमौ उद्यानस्य निर्माणं कर्तव्यं तत्र सर्वप्रथमं तिलान् वपेत्, यदा ते तिलाः पुष्पिताः भवेयुः तदा तेषां भूमौ मर्दनं कुर्यात्। एष भूमेः प्रथमः संस्कारोऽस्ति।[4]

उद्याने रोपणीयाः वृक्षाः-

सर्वप्रथमम् उद्याने अथवा गृहसमीपे अशोक-पुन्नाग-शिरीष-प्रियङ्गवादयः वृक्षा रोपणीयाः। वराहमिहिरस्यानुसारेण एते सर्वेऽप्यरिष्टनाशका एवं मङ्गलफलदायकाः वृक्षाः सन्ति।[5]

वृक्षरोपणस्य कालः-

विविधप्रकाराणां वृक्षाणां रोपणस्य कालनिर्धारणं कुर्वन् वराहमिहिरेणोक्तं यद् अजातशाखाः वृक्षाः, येषु वृक्षेषु लताङ्कुरादयो न भवन्ति। एते शिशिरर्तौ (माघफाल्गुनयोः), शाखायुक्ताः तु हेमन्ते, तथाच सुस्कन्धाः वृक्षाश्च वर्षाकाले (श्रावणभाद्रपदयोः) रोपणीयाः।[6] वृक्षरोपण-प्रकारः कथयन् कथ्यते यत् पनसाशोककदलीजम्बुलकुचदाडिमद्राक्षापालीवतबीजपुरातिमुक्ता-वृक्षा सशाखं गोमयलिप्ता रोपणीयाः। वृक्षाः घृतक्षीरगोमयादिलिप्तामूलात् खात्वा अन्यत्र रोपणीयाः। अयं विधिरेव सङ्क्रामणविधिः कथ्यते।[7]

---

1. मेदिनीकोषः, पृ.२१६
2. तत्रैव
3. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.१
4. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.२
5. अरिष्टाशोकपुन्नागशिरिषा सप्रियङ्गवः।
   मङ्गल्या पूर्वमारामे रोपणीया गृहेषु वा।। बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.३
6. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.६
7. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.४-५

वृक्षारोपणस्य नक्षत्राणि-

वराहमिहिरेण कथ्यते यत् त्रयः उत्तराः (उ.फा., उ.षा., उ.भा.), रोहिणी-मृगशिरा-रेवती-चित्रा-अनुराधा-मूल-विशाखा-पुष्य-श्रवण-अश्विनी-हस्तनक्षत्राणि दिव्य-दृष्टियुक्तमुनिभिः वृक्षरोपणस्य कृते श्रेष्ठानि उक्तानि।[1]

वृक्षरोपणस्य विधिः-

वृक्षरोपणम् एकं पवित्रकार्यं मन्यते, अतः वृक्षारोपणात् पूर्वं व्यक्तिः स्नात्वा पवित्रं भूत्वा चन्दनादिना वृक्षाणां पूजनं कुर्यात्। ततः स वृक्ष एकस्मात् स्थानाद् अपरे स्थाने रोपणीयः। प्रप्रथमं घृतक्षौद्रतिलमधुवायविडङ्गदुग्धगोमयेत्यादीनां चूर्णं कृत्वा मूलादारभ्य अग्रभागपर्यन्तं लेपयित्वा वृक्षं एकस्थानाद् अपरस्थानं प्रति नेतुं शक्यते। एवं वृक्षो हरितपर्णयुतो भवति अर्थात् शुष्कतां न प्राप्नोति।[2]

वृक्षसेचनस्य प्रकारः क्रमो वा-

वराहमिहिरेणोच्यते यद् रोपितेषु वृक्षेषु ग्रीष्मर्तौ प्रातःसायङ्कालयोः एवं शीतर्तौ दिनान्तराले जलं प्रदेयम् अर्थात् एकं दिनं त्यक्त्वा जलेन सेचनीयम्। वर्षर्तौ भूमेः शुष्के सत्येव वृक्षाणाम् जलं दद्यात्। येषां वृक्षाणां वृद्ध्यर्थमधिकजलस्यावश्यकता तेषां अवरोपणोपक्रमस्य ज्ञानं वराहमिहिरेण कथ्यते यत्, जम्बूफलवेतवानीर कदम्ब-उदुम्बरार्जुनबीजपूरकदाडिमल कुचद्राक्षावञ्जुल-नक्तमाल(करंज)तिलकपनसतिमिराम्रातकश्च इत्येते षोडशप्रकाराः वृक्षाः जलप्राचुर्यस्थलेषु अर्थात् यत्र भूमिगतजलस्य मात्रा अधिका तत्रैव रोपणीयाः।[3]

वृक्षारोपणक्रमस्य विषये वराहमिहिरेण कथ्यते यद् वृक्षाणां मध्ये परस्परं विंशति-हस्तान्तरं स्यात्, षोडशहस्तस्यान्तरं मध्यमं तथा द्वादशहस्तस्यान्तरमधमं स्वीकृतम्।[4] आचार्येण कथ्यते यद् वृक्षाणां परस्परमतिसन्निकृष्टत्वेन तेषां परस्परं स्पर्शः सञ्जायते येन तेषां मूलानामपि परस्परं सम्मेलनं भवति। एवं सति सर्वे वृक्षाः पीडिताः सम्यक् प्रकारेण पुष्पफलानि न ददति।[5]

वराहमिहिरः वृक्षायुर्वेदाध्याये कथयति यद्यत्र कण्टकयुक्ता वृक्षाः स्युः अथवा अकण्टकयुक्तवृक्षाणां मध्ये एकः कण्टकयुक्तो वृक्षः स्यात् तर्हि तस्माद् वृक्षात् त्रिहस्तपश्चिमदिशि त्रिपुरुषाधः (३६० अंगुलानि) जलं धनं वा भवति। यथोक्तम्-

---

1. ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाश्विनी हस्तः।
   उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि।। बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.३१
2. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.८
3. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.९ तत्रैवश्लो.१०-११
4. बृहत्संहिता, वृक्षायुवेदाध्यायः, श्लो.१२
5. बृहत्संहिता, वृक्षायुवेदाध्यायः, श्लो.१३ तत्रैव श्लोक-१३

कण्टक्यकण्टकानां व्यत्यासेऽम्भस्त्रिभिः करैः पश्चात्।
खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात्॥[1]

कलमीवृक्षनिर्माणस्य विधानम्-

काण्डरोप्याणां (कलमीति भाषायां) विधानविषये वराहमिहिरेण कथ्यते यत् पनसाशोककदली- जम्बूलकुचदाडिम-द्राक्षापालीवतबीजपूरातिमुक्तका इत्येतेषां वृक्षाणां काण्डरोप्यशाखाः गोमयेन प्रलेपिताः विजातीयवृक्षाणां मूले शाखायां वा योजयेत्। तत्र एकस्य नवीनवृक्षस्योत्पत्तिर्जायते।[2]

एकदिने बीजाङ्कुरणम्

एकस्मिन्नैव दिने बीजानि अङ्कुरितानि भवेयुः। एतदर्थं कथितं यत् श्लेषान्तक (लसोड)- वृक्षस्य बीजम् अङ्कोलफलमध्यगतजलेन भावनां दत्वा छायायां शुष्कं कुर्यात्। एषां प्रक्रियां सप्तवारं कुर्यात्। ततः तं बीजं महिषेः गोमयेन घर्षणं कृत्वा महिषेः शुष्कगोमयस्य समूहे स्थापयेत्। तत्पश्चात् हिमखण्डैः आर्द्रमृत्तिकायां तानि बीजानि वपेत् तर्हि एकस्मिन् दिने फलयुक्तपादपबीजाङ्कुरणं भविष्यति।[3]

एतावदेव वराहमिहिरेण शीघ्रपादपोत्पादनस्य विधिः कथितः। अंकोल-वृक्षस्य फलस्य कल्केन(सारेण) तैलेन वा अथवा श्लेष्मातकस्य (लसोडस्य) फलस्य कल्केन तैलेन वा शतवारं भावनां दत्त्वा हिमखण्डैः आर्द्रमृत्तिकायां येषामपि बीजानां वपनं क्रियते, तेषां तत्क्षणे एव उत्पत्तिः भवति, तथा तेषां शाखाः फलानां भारेण नमन्ति। बुद्धिमता अस्मिन् विषये न शङ्कनीयाः।[4]

वृक्षेषु रोगोत्पत्तेः कारणं निवारणञ्च-

अस्मिन् सन्दर्भे वराहमिहिरेण उक्तं यद् अतिशयशीतसमीरातपैश्च वृक्षा व्याधिग्रस्ता रोगग्रस्ता वा भवन्ति। रोगीवृक्षाणां पत्राणि पीतानि भवन्ति। तेषां वृद्धिर्न भवति। यदि शाखाः भवन्ति तेषां बीजानि अङ्कुरितानि न भवन्ति। आचार्येण कथ्यते यद् एतेषां रोगीवृक्षाणां चिकित्सा कर्तव्या। सर्वप्रथमं यस्य वृक्षस्य यदङ्गम् पूर्वोक्तविकारेण युक्तमस्ति तत् शस्त्रेण कर्तनीयम् ततः वायविडङ्गघृतपङ्कानां मेलनं कृत्वा वृक्षेषु लेपनं कुर्यात् तदनन्तरं दुग्धमिश्रितजलेन सिञ्चेत् तर्हि वृक्षः रोगमुक्तः भविष्यति नात्र संशयः।[5]

वृक्षेषु यदि फलानि न फलन्ति अथवा फलानि शीघ्रं विनश्यन्ति तदा कुलत्थ-माष-

---

1. बृहत्संहिता, दकार्गलाध्यायः, श्लो.५३
2. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.४-५
3. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.२९
4. तत्रैव
5. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लोक-१४, १५

मुद्ग–तिल–यवेत्यादिवस्त्रूनि दुग्धं मेलयित्वा ऊष्णं कुर्याद् ततः तं दुग्धं शीतलं कृत्वा तेन वृक्षाणां सेचनं कुर्यात् तदा निश्चयेन एव तस्य वृक्षविशेषस्य फलपुष्पयोश्च वृद्धिः सम्पत्स्यते।[1] एडकायाः अजायाः वा विष्णः चूर्णम् आढकद्वयम् एकाढकतिलान् सक्तूश्च एकप्रस्थमात्रं एकद्रोणजलं गोमांसम् एकतुलामितं इत्येतान् सर्वान् मेलयित्वा एकस्मिन् पात्रे सप्तदिनपर्यन्तं स्थापयेत् ततः अनेन मिश्रणेन वृक्षगुल्मलताः सेक्तव्याः निश्चयेनैव फलपुष्पयोः वृद्धिः भविष्यति।[2]

यदि कश्मिंश्चिद् वृक्षे पुष्पाणि काठिन्येन उत्पद्यन्ते तर्हि तस्य वृक्षस्य घृतयुक्तहस्तेन बींज लेपयित्वा दुग्धे क्षिपेत् एवं दशदिनपर्यन्तं कुर्यात्। ततः तं बीजं गोमये अनेकशं लेपयित्वा छायायां शुष्कं कुर्यात्। शुष्के सति काकोल–हिरणयोः मांसस्य धूपं दद्यात्, तत्पश्चात् तं बीजं शुद्धसंस्कारित–भूमौ रोपयेत् तथा च दुग्धमिश्रितजलेन सिञ्चेत् तदा पुष्पयुक्तवृक्ष उत्पत्स्यते।[3] तत्र चिञ्चिणी– कपित्थवृक्षयोः तथा अन्येषां वृक्षाणां रोपण–विधिरपि वराहमिहिरेण अस्मिन् अध्याये सम्यग्रूपेण प्रतिपादितः।[4]

बृहत्संहितायाः दकार्गलाध्याये आचार्यवराहमिहिरेण षडशीतिर्वृक्षा उपवर्णिताः तथा वृक्षायुर्वेदाध्याये पञ्चाशत्प्रकाराणां वृक्षाणां वर्णनं कृतम्। अनेन प्रकारेण आहत्य षट्त्रिंशदधि कशतप्रकाराणां वृक्षाणां वर्णनं बृहत्संहितायामभवद् येषां कानिचन नामानि लिख्यन्ते–

वेतसः,[5] जम्बूफलम् (जामुन)[6], उदुम्बरः[7], वीततरुः (अर्जुनः)[8], निर्गुण्डी[9], बदरीफलम्[10], किंशुकः (पलाशः)[11], बिल्वम्[12], काकोदुम्बरिका[13] (काकोदुम्बरिका फल्गुर्मलपूर्जघने फलेत्यमरः) कम्पिल्लकः (कवीला)[14], शोणाकः सरिवनः[15], विभीतकः[16], कोविदारकः (छितिवनः)[17], करञ्जकः[18], मधूकः[19], तिलकः (तालमखाना)[20], कदम्बः (नीपः)[21], तालः[22], कपित्थम्[23], अश्मन्तकः[24], हरिद्रा[25], वीरणः[26], सहस्रवीर्यः (दूर्वा)[27], भृङ्गराज–त्रिवृता–दन्ती–

1. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लोक–१६
2. अविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम्।
   सक्तुग्रस्थो जलद्रोणो गोमांसतुलया सह।। बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.१७–१८
3. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.१९
4. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.२०
5. बृहत्संहिता, दकार्गलाध्यायः, श्लो.६
6. बृहत्संहिता, दकार्गलाध्यायः, श्लो.८
7. वृहत्संहिता, दकार्गलाध्यायः, श्लो.११
8. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१२
9. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१४
10. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१६
11. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१७
12. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१८
13. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१९
14. बृहत्संहिता, दकार्गलाध्यायः, श्लो.२१
15. बृहत्संहिता, दकार्गलाध्यायः, श्लो.२३
16. बृहत्संहिता, दकार्गलाध्यायः, श्लो.२४
17. बृहत्संहिता, दकार्गलाध्यायः, श्लो.२८
18. बृहत्संहिता, दकार्गलाध्यायः, श्लो.३३
19. बृहत्संहिता, दकार्गलाध्यायः, श्लो.३५
20. बृहत्संहिता, दकार्गलाध्यायः, श्लो.३७
21. बृहत्संहिता, दकार्गलाध्यायः, श्लो.३८
22. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४०
23. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४१
24. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४३
25. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४५
26. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४७
27. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४७

(यपाल)सूकरपादी-लक्ष्मणा-आक्रातक-वञ्जुलाः (अशोकाः)[1], अतिवला-पारिभद्रौः[2], कण्टकारिका[3], खर्जूरी[4], कर्णिकारः[5], पिलुः[6] (पिलौ गुडफलः स्रंसीत्यमरः), करीरः[7], लालकरञ्जः (रोहितकः)[8], धन्तूर-कुशे[9], शमी[10], वट-अश्वत्थौः (पिप्पलः)[11], शाल-सर्ज-काश्मरी-(भद्रपर्णी)-अरिष्ट-धव-शिंशपाः[12], तेन्दुमोक्षक-अपामार्ग-गुडूच्यः[13], तिलाकौः, नागरखेलः[14], कदली[15], निचुलः[16], नीप-आम्र-पिलखन- कुरबक-ताल-मधूकाः[17] सौवीरक-(अञ्जनम्) मुस्ता-उशीर-राजकोशातक-अमलक-कतकाः[18], पुन्नाग-प्रियङ्गु-शिरीष-पनस-लकुचाः[19], अंकोल-श्लेष्मातकौ[20], दाडिम-द्राक्षा-पालीवत-बीजपूरा- अतिमुक्ताः[21], इत्यादयः।

उपर्युक्तनामावली वृक्षमालाया एका ग्रन्थावली सदृशा प्रतीयते। एतेषां वृक्षाणां ज्ञानं न केवलं कुशलवैद्यानां कृते अपितु वनस्पतिशास्त्रज्ञानां कृतेऽपि कष्टकरं दृश्यते। एतेषु वृक्षेषु बहूनां प्राचीनवृक्षाणां नामानि अद्यापि वनस्पतिशास्त्रज्ञानां कृते समस्याभूतानि सन्ति। वराहमिहिरेण एतेषां वृक्षाणाम् उत्पादनविधिः, उपयोग-प्रयोगयोः विधिरपि सविस्तरेण प्रतिपादितः। वैद्यस्य कृते वनस्पतीनां, लतानां औषधिवृक्षाणां ज्ञानम् आवश्यकं भवति। ज्योतिषज्ञाय ग्रहनक्षत्रसम्बन्धि तवृक्षाणां धार्मिकवृक्षाणां वा ज्ञानं भवेत्। कर्मकाण्डीपुरोहिताय यज्ञीयवृक्षाणां समिधासम्बन्धि तवृक्षाणां धार्मिकवृक्षाणां वा ज्ञानं स्यात्। वराहमिहिरस्य वृक्षज्ञानं अधिकविस्तृतं विलक्षणं वा आसीत्। स्व-वनस्पतिज्ञानस्य सन्दर्भे वराहमिहिरेण वृक्षायुर्वेददकार्गलाध्याययोः सारस्वतनामक-विदुषः मुहुर्मुहुः चर्चा कृता। एवमेव मनोः नामोल्लेखोऽपि आचार्येण वनस्पतिशास्त्रज्ञरूपे कृतः।

---

1. बृहत्संहिता, दकार्गलाध्यायः, श्लो.४८
2. बृहत्संहिता, दकार्गलाध्यायः, श्लो.५०
3. बृहत्संहिता, दकार्गलाध्यायः, श्लो.५६
4. बृहत्संहिता, दकार्गलाध्यायः, श्लो.५८
5. बृहत्संहिता, दकार्गलाध्यायः, श्लो.५९
6. बृहत्संहिता, दकार्गलाध्यायः, श्लो.६३
7. बृहत्संहिता, दकार्गलाध्यायः, श्लो.६७
8. बृहत्संहिता, दकार्गलाध्यायः, श्लो.७९
9. बृहत्संहिता, दकार्गलाध्यायः, श्लो.२८
10. बृहत्संहिता, दकार्गलाध्यायः, श्लो.८१
11. बृहत्संहिता, दकार्गलाध्यायः, श्लो.९६
12. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१०५
13. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१३
14. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१६
15. बृहत्संहिता, दकार्गलाध्यायः, श्लो.११७
16. बृहत्संहिता, दकार्गलाध्यायः, श्लो.११९
17. बृहत्संहिता, दकार्गलाध्यायः, श्लो.११९
18. बृहत्संहिता, दकार्गलाध्यायः, श्लो.१२१
19. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.३
20. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.२७
21. बृहत्संहिता, वृक्षायुर्वेदाध्यायः, श्लो.४
22. बृहत्संहिता, भट्टोत्पलटीका-द्वितीयभागः, दकार्गलाध्यायः, श्लो.६४

अमुकवृक्षस्य खनने सति मतेहस्ताधोभागे किं किं प्राप्स्यते? अस्मिन् विपये वराहमिहिरेण दकार्गलाध्याये चर्चा कृतास्ति। वस्तुतः अस्माकम्षीणामाचार्याणाञ्च वनस्पतिशास्त्रस्य ज्ञानं भूगर्भविज्ञानं व विशदमासीत्। वृक्षायुर्वेदे सकारणं रोगाणां लक्षणं निदानं चाचार्यैः प्रतिपादितमस्ति। अर्वाचीनकालेऽपि काण्डरोप्यादिकानां विधानं प्राप्यते, तत्र प्राचीन शास्त्रोक्तानां सिद्धान्तानां यदि प्रयोगं कुर्मः तर्हि अवश्यमेव साफल्यं प्राप्स्यामः। वनस्पतिशास्त्रस्य प्रबुद्धज्ञाता वराहमिहिरः युगादिपर्यन्तमस्माकं मध्ये यशश्शरीरेण जीवयिष्यत्येव।

*****

वैदिकवाङ्मये वास्तुनिदर्शनम्

डॉ. हनुमान मिश्र

भारतीया संस्कृतिः सम्पूर्णस्यास्य विश्वस्य सर्वोत्तमा संस्कृतिः । तत्र वेदानां स्थानमतिमहत्वपूर्णं वर्तते । यतो ह्येषा भारतीया संस्कृतिः वैदिकचिन्तनधाराधारभूता । वेदादेव सांस्कृतिकज्ञानधारा निःसरति । वेद एव ज्ञानराशे उद्गम- स्थानमित्यत्र नास्ति संदेहस्यावकाशः । यथोक्तं मनुस्मृतौ-

चातुर्वर्णं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविश्यं च सर्वं वेदात् प्रसिद्ध्यति ॥[1]

विविधविद्यानां ज्ञानं वैदिकग्रन्थानामध्ययनेन सुतरामेव भवति। ऋग्यजुसामाथर्ववेदेषु, शिक्षादिषड्वेदाङ्गेषु, न्यायवैशेषिकाद्युपाङ्गप्रभृतिशास्त्रेषु च कृषिविज्ञान-वनस्पतिविज्ञान-प्राणिविज्ञान-चिकित्साशास्त्र-स्थापत्यकला (वास्तु) - गणित-ज्योतिःशास्त्र-पर्यावरणविज्ञान-पशुचिकित्सा-राजनीति-अर्थशास्त्रप्रभृतिविषयाः सम्यक् प्रतिपादिताः सन्ति । अत एव महर्षिणा मनुना पौनः पुन्येन भणितं यत् -

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥[2] इति।

ज्ञानोपासनाकर्मेति काण्डत्रययुतानां वेदानां चत्वार उपवेदा अपि वर्णिताः सन्ति शास्त्रेषु, ते क्रमश आयुर्वेद-धनुर्वेद-गान्धर्ववेद- स्थापत्यवेदेति नाम्ना प्रसिद्धः । ऋग्वेदस्योपवेद आयुर्वेदः, यजुर्वेदस्योपवेदः धनुर्वेदः, सामवेदस्योपवेद गान्धर्ववेदः, अथर्ववेदस्योपवेदः स्थापत्यवेदः। अथर्ववेदस्य पञ्चोपवेदाः गोपथब्राह्मणे वर्णिताः[3], तेष्वन्यतमः स्थापत्यवेदः, यस्मिन् प्राचीनवैदिकवास्तुविद्यायाः ज्ञानमुपबृंहितमस्ति। यथोक्तम् -

स्थापत्यमुच्यतेऽस्माभिरिदानीं प्रक्रमागतम् ।
ज्ञातेन येन ज्ञायन्ते स्थपतीनां गुणा गुणाः ॥[4]

स्थापत्यशब्दस्य अर्थः शिल्पविद्या वास्तुविद्या च भवति । अष्टादश आचार्या अस्या विद्यायाः प्रवक्तारः आसन् ये च स्वतपोबलेन विद्यामिमामधिगतवन्तः । ते यथा-

1. मनुस्मृति 12/97
2. मनुस्मृति 2/7
3. गोपथब्राह्मण 01/10
4. समरांगसूत्रधार 8/1 (स्थपतिलक्षणम्)

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ॥
ब्रह्म कुमारो नन्दीशः शोनको मार्ग एव च ।
वासुदेवोऽग्निरुद्धश्च तथा शुक्रबृहस्पती ।
अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः ॥[1]

एते सर्वे वेदज्ञाः वेदमन्त्राणां द्रष्टारश्चासन् । अतएव समग्रे वैदिकसाहित्ये अस्या वास्तुविद्यायाः निदर्शनं भवति । तत्र विशेषरूपेण वेदसंहितासु, उपवेदेषु, श्रौतसूत्रेषु, ब्राह्मणग्रन्थेषु च वास्तुचर्चा कृताऽस्ति ।

वास्तुशब्दः **'वस्' धातो तुण्** प्रत्यये कृते सिद्धयति । अस्य शब्दस्य व्युत्पत्तिलभ्यः अर्थ– गृहनिर्माणभूमिः, निवासभूमिः, यज्ञभूमिः, देवालयः, सामान्यभूखण्डश्च भवति ।[2] उक्तञ्च शब्दकल्पद्रुमे – **''वसन्ति प्राणिनो यत्र'' ''वस् निवासे णिच्'' गृहकरणयोग्यभूमिः ।** अन्यत्रापि – **'वसन्त्यत्र' 'वसेस्तुन्नगारे णिच्च' इति तुन् । 'वास्तु स्याद् गृहभूपुर्योगृहे सीमसुरङ्गयो' इति हैमः।**[3] **'वास्तुनि गृहभुवि भवो वास्तव्यः।**[4] वास्तु गृहस्य स्वामी गृहरक्षणकर्ताऽपि भवति । यथोक्तम् –

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च।
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च।।[5]

वास्तुपुरुषस्य नामान्तरमपि शास्त्रेषु प्रदत्तम्। यथा– विश्वः विराट्पुरुषः, प्रजापतिः, विश्वकर्मा, विष्णु, इन्द्र इत्यादि ।

वास्तुकला–

आचार्यवात्स्यायनः स्वग्रन्थे कामसूत्रे चतुःषष्टिकलायाः प्रतिपादनं कृतम्, तत्रापि वास्तुकलायाः वर्णनं निगदितम् । महेश्वरस्य त्रिमूर्तिः, ताण्डवनृत्यं कुर्वन् नटराजमूर्तिः इत्यादयः वास्तुकलाया एव प्रतीकत्वेन परिगणिताः । अन्यान्यपि उदाहरणानि सन्ति यत्र वास्तुकलायाः श्रेष्ठ–प्रदर्शनं भवति, तेषूदाहरणेषु कानिचन मयाऽत्र प्रस्तूयन्ते ।

1. चिदम्बरम् –

तमिलनाडुराज्यस्य मद्रासनगरे शैवधर्मावलम्बिनां पवित्रस्थलरूपेण विख्यातं नगरमिदम् ।

---

1. समरांगसूत्रधार, भवन निवेश, भूमिका, पृ. 3 (मेहरचन्द लक्ष्मणदास प्रकाशन)
2. वाचस्पत्यम्
3. हैमः 2/199 उद्धृतं अमरकोश, रामाश्रमीटीका 2/2/19
4. तत्रैव महीधरभाश्ये 16/39
5. शु.य.16/39

प्राचीनमन्दिरस्य नगरत्वेनास्य गणना भवति । द्रविड़शैल्यां निर्मितानि देवमन्दिराणि वास्तुकलायाः श्रेष्ठोदाहरणानि सन्ति।

2. एलीकेन्टा -

महाराष्ट्रप्रान्तस्य मुम्बईनगरपार्श्वे एकः गह्वरः (गुफा) अस्ति, तस्य नाम एलीकेन्टा इति । बृहत्पर्वताभ्यन्तरे निर्मितोऽयं गह्वरः अतीवकलात्मकः । अस्मिन् पुराणोक्तदेवदेवीनां भव्यं स्वरूपं निर्मितमस्ति ।

3. कोणार्कः -

उत्कलप्रदेशे पुरीजनपदे विद्यमानमिदं क्षेत्रं सूर्यमन्दिरेण ख्यातम् । अस्य मन्दिरस्य शिखरं वास्तुकलाया अभूतपूर्वमुदाहरणमुदाहरति । मन्दिरस्यास्य भित्तीष्वपि नानाकलाकृतयः प्रदर्शिताः सन्ति ।

पौरोहित्यकर्मणि वास्तु -

यत्र तत्र वैदिकयागे नानाविधयागमण्डपादीनां निर्माणं वास्तुनिर्देशपुरःसरं भवति। उदाहरणार्थं वयं पश्यामः यद् दर्शपौर्णमासयागे वेदिकासम्पदानार्थं भूमिखननविधौ पूर्वपश्चिमोत्तरदक्षिणादि-दिक्षु पृथक् पृथक् मापनविधिना रेखा क्रियते।[1] एवमेव चितियागे वेदिकाचयनं वास्तुनिर्देशानुसारं भवति ।[2] यतो हि वैदिकाख्याने निगदितं यत् यागवेदिकानिर्माणं वैदिकवास्तुविधिना एव करणीयम्, अन्यथा प्रयुक्तस्य यागस्य फलं विपरीतं भविष्यति, फले विपरीते सति यजमानहानिः लोकहानिश्च भविष्यत्येव।[3]

स्मार्तपौरोहित्यकर्मणि वास्तुदेवस्य मण्डलनिर्माणं भवति यत्र वास्तुदेवस्य आवाहनं पूजनञ्च भवति । वास्तु पुरुषोऽपि वर्तते, स्मार्तयागे **वास्तुपुरुषाय नमः**[4] इत्युक्त्वा नमस्कारसमर्पणं क्रियते यजमानेन । गृहादिनिर्माणप्रारम्भे सति भूमौ वास्तुपूजनं शिलान्यासश्च भवति। पौराणिकाख्यानानुसारेण वास्तुपुरुषस्योत्पत्तिः शिवस्य स्वेदबिन्दुना सञ्जाता। स उत्पन्नो भूत्वा अन्धकयुद्धे असुराणां रक्तपानमकरोत्। अन्धकादीनां रक्तपानेन अपि स अतृप्तो भूत्वा विश्वभक्षणाय समुद्यतोऽभवत्। तमधोमुखं कृत्वा तदा ब्रह्मादयः सर्वे देवाः तस्य शरीरोपरि स्वासनमासाद्य तं स्तम्भितं कृतवन्तः । ततः तस्य क्षुधाशान्त्यर्थं वास्तुपूजनविधानस्यारम्भो जातः । अनन्तरं वास्तो भेदप्रभेदः संजातः, तत् पौरोहित्यकर्मणि दृष्टिपथे आयाति, तत्र पृथक् पृथक् वास्तुमण्डलनिर्माणं भवति, क्वचिद् चतुःषष्टिकोष्ठात्मकं क्वचिच्च एकाशीतिकोष्ठात्मकं कुत्रचित् शतकोष्ठात्मकञ्च मण्डलनिर्माणं भवति ।

---

1. शु.य. 01/27
2. शु.य. 11 अध्याये
3. तत्रैव द्वितीयेऽध्याये
4. प्रतिष्ठा महोदधि वास्तुपूजनप्रकरण

गृहदेवालयादि निर्माणे वास्तु -

गृहनिर्माणे सर्वादौ वास्तुपूजनं क्रियते। तदर्थं भूमिः कथं स्यात्, वास्तुपिण्डस्य स्वरूपं कथं वा स्यात्, इत्यादि सर्वं विचारणीयं भवति । वस्तुतः वास्तो कायभागः जले पृथिव्यामन्तरिक्षे च सर्वत्र व्याप्तः । स भूमौ निर्माणकर्त्तृरूपेण विद्यते। अतएव भवननिर्माणप्रारम्भकाले भूमिपूजनं (शिलान्यासं) भूमिशोधनञ्च क्रियते ।

गृहवास्तुविषये ऋग्वेदे प्रार्थना अस्ति यद् अस्माकं गृहं सर्वतः सुखवर्धकं, रोगरहितञ्च भवेत् यस्मिन् सर्वतः वायुप्रवेशः सूर्यरश्मिप्रवेशश्च भवेत् । यथा–

अमीवहा वास्तोष्पते विश्वारूपान्याविशन् सखा सुशेव एधिनः ।
वास्तोष्पते सर्वाणि रूपाण्याविशन् सखा नः सुसुखो भव ॥[1]

अर्थात् गृहाभ्यन्तरे वायुप्रवेशः सूर्यप्रकाशप्रवेशश्च स्यात्, येन च गृहे निवासकर्तारः सर्वदा रोगरहिताः आनन्दानुभूतियुक्ताश्च भवन्तु। यतो हि वास्तुविधिः आचरिते सति तस्मिन् गृहे कदापि स्वास्थ्यस्य, धनस्यान्नस्य च न्यूनता न भविष्यति । तथा प्रतिपादितमृग्वेदे यजुर्वेदे च -

विश्वकर्मा विमना भूतिव्याप्ता धाता च विधाता च परमश्च सन्द्रष्टा।[2]
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्र सप्त ऋषीन् पर एकमाहु ॥[3]

विश्वकर्मानामकप्राणवायुः प्रभूतज्ञानयुक्त अस्ति । 'विधाता' जीवनधारणसमर्थ अस्ति, सः सर्वकर्मनिरीक्षणकर्ता चास्ति। स च वास्तुः देवस्वरूपेऽपि परिगणितः। वेदे स्थापत्यज्ञं 'विश्वकर्मन्' इति सम्बोधनेन उक्तमस्ति। येन स्वहस्तेन वास्तुसम्बद्धोपकरणानां निर्माणं कृतम्। यथा–

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावा भूमी जनयन्देव एकः ॥[4]

विश्वकर्मणा सह वास्तुविदामन्यसमूहोऽपि एकीभूय विस्तृतरूपेण भूमिं प्रतिष्ठापितवन्तः, यतो हि नववास्तुनिर्माणे नानाज्ञानसमूहः कार्यं करोति। यथा–

---

1. ऋग्वेद 07/55/01
2. तत्रैव 10/82/02
3. शु.य. 17/26
4. शु.य. 17/19

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद्यावा पृथिवी अप्रथेताम्।[1]

अनेन सहैव वास्तुसम्बद्धोपकरणनिर्माणे पञ्चमहाभूतानां शक्तेः प्रयोगमपि समभूत् । तद्यथा–

विश्वकर्मन्हविशा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥[2]

वेदाङ्गानां मतमस्ति यत् पृथिव्यां यत् किञ्चिदपि निर्माणकाले सर्वादौ वास्तुविचारः करणीय एव। यतो हि भूमिः वास्तुनिर्देशानुसारं सम्यक् नास्ति चेत् निर्माणानन्तरं सा निश्चयमेव अशुभफलदायिनी भविष्यति ।

'बृहद्वास्तुमाला' इति ग्रन्थे गृहदेवालयकार्यालयादीनां निर्माणार्थं भूमिलक्षणं प्रतिपादितम्। तद्यथा –

1. सर्वत्र सर्वदा अनूषरा, स्निग्धवती, बहूदका, तृणोपलान्विता समा च भूमिः शुभदायिनी भवति।[3]
2. सुगन्धयुक्ता भूमिः सर्वकार्याय शुभा, यत्र सर्वे निर्माणं कर्त्तुं शक्नुवन्ति।[4] परञ्चैतादृशा भूमिः दुर्लभा भवति।
3. चतुरस्त्रभूमिः आयताकारभूमिः भद्रभूमिः वृत्ताकारभूमिश्च देवालयाय गृहाय च शुभदायिनी भवति।[5]
4. कूर्मपृष्ठा भूमिः धनधान्यवृद्धिकारिणी कथिता।[6]
5. चिताभूमिः, अंगारभूमिः, स्फुटिता, ऊषरा, वल्मीकयुता च भूमिः अशुभदायिनी प्रोक्ता ।[7]
6. पूर्वदिशावनतभूमिः धनदायिनी ।
7. अग्निकोणावनतभूमिः मृत्यु शोकव्याधिप्रदात्री भवति।[8]

अनेन प्रकारेण वास्तुशास्त्रे नैके सिद्धान्ताः नियमाश्च वर्णिताः। सर्वं विचार्य दोषादिकं परिमार्ज्य यद् भवनं निर्मीयते तदानन्दवर्धकं धनधान्यप्रवर्धकञ्च भवति ।

---

1. शु.य. 17/25
2. शु.य. 17/22
3. बृहद्वास्तुमाला मिश्रप्रकरण 77
4. बृहद्वास्तुमाला मिश्रप्रकरण 31
5. बृहद्वास्तुमाला मिश्रप्रकरण 90
6. तत्रैव
7. तत्रैव 79–81
8. तत्रैव 37–39

वास्तुशास्त्रदृशा जम्बूद्वीपविमर्शः

डॉ. अशोक थपलियालः
गोविन्दवल्लभः

भारतीयज्ञानविज्ञानवाङ्मये खगोल-भूगोल-आयुर्वेद वनस्पति-रसायन-भौतिक-धातुविज्ञान-सामाजिक-राजनीतिक-आलृथकदीनां विषयाणां विस्तृतविवरणं प्राप्यते। वैदिकवाङ्मयं हि सम्पूर्ण-भारतीयचिन्तनपरम्परायाः मूलं वर्तते। वस्तुतस्तु अस्मिञ्जगति किमपि तत्त्वमेतादृशन्नास्ति यद्वेदे सन्निहितन्न भवेत्। यथा मनुनोक्तम् - **भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्धयति**[1]। अथर्ववेदस्योपवेदः स्थापत्यवेदः प्रसिद्धः। अयमेव सम्प्रति वास्तुशास्त्रनाम्ना व्यवह्रियते। स्थापत्यशास्त्रम् शिल्पशास्त्रञ्चेति अपरनामानि वास्तुशास्त्रस्य। गृहमन्दिरप्रासादादिनिर्माणविषयकं चिन्तनं वास्तुशास्त्रे विद्यते। वास्तुशास्त्रवाङ्मये न केवलं वास्तुनिर्माणविषयकं चिन्तनमपितु भूमेः प्रधानत्त्वाद् भूगोलवर्णनमपि दरीदृश्यते। वास्तुशास्त्रे भूगोलविषयकं यद्वर्णनं प्राप्यते तस्यानुसारेण जम्बूद्वीपविमर्शः अस्मिन्शोधपत्रे कृतमस्ति।

इयं वसुमती सप्तद्वीपवती अस्तीति प्राचीनभूगोलवर्णनेषु प्राप्यते। सप्तद्वीपानां विस्तृतवर्णनं पुराणेषु विस्तृततया उपलभ्यते। पौराणिकशास्त्रानुसारेण **''जम्बूद्वीपः प्लक्षद्वीपः शाल्मलिद्वीपः कुशद्वीपः क्रौञ्चद्वीपः शाकद्वीपः पुष्करद्वीपश्चेति''** सप्तद्वीपाः पृथिव्याः भागाः सन्तीति वर्णनं प्राप्यते। प्राचीन भूगोलविज्ञानानुसारेण पृथिवी सप्तद्वीपेषु विभक्ताऽस्ति। यद्यपि सप्तद्वीपानां वर्णनं प्राचीनेषु साहित्येषु बहुषु स्थलेषूपलभ्यते परन्तु पुराणेषु वर्णनमिदं विस्तृततया दृश्यते। वास्तुशास्त्रस्य समराङ्गणसूत्रधारग्रन्थे अपराजितपृच्छायां चापि सप्तद्वीपानां वर्णनं विशदतया प्राप्यते। उच्यते हि अपराजितपृच्छायां-

जम्बूः प्लक्षः कुशक्रौञ्चौ शाल्मलिश्च तथैव च।
शाकस्तथा सप्तमाख्यातः पुष्कराख्यश्च सप्तमः[2]**।।**

अपराजितपृच्छानुसारेण एतेषु सप्तद्वीपेषु मेरु-मन्दर-गन्धमादन-हिमालय-हेमकूट-निषध-नील-श्वेत-शृंगवान्-कुलाचलसंज्ञकाः दशपर्वताः सन्ति[3]। एतेषां पर्वतानाश्रित्य माहेन्द्र-

---

1. मनुस्मृति 12.97
2. अपराजितपृच्छा 4.18-19
3. मेरुश्च मन्दरश्चैव तृतीयो गन्धमादनः।
   हिमवान् हेमकूटश्च निषधो नील एव च।।
   श्वेतश्च शृङ्वांश्चैव जाता अन्ये कुलाचलाः।। अपराजितपृच्छा 4.27-28

मलय-सह्य-विन्ध्य-हेमन्त-पारिजात-श्रीशैल-आबू-उदियाद्रि-त्रिकूट-द्वीपशैल- विन्ध्याचलश्चेति द्वादशसंख्यकानि वनोपवनकाननानि विद्यन्ते[1]।

सप्तद्वीपानां पौराणिकदृष्ट्या यद्वर्णनं प्राप्यते प्रायः तादृशमेव वर्णनं वास्तुशास्त्रीयग्रन्थेष्वपि दृश्यते। परञ्च आधुनिकदृष्ट्या साम्प्रतिकानां द्वीपानां वर्णनं प्राचीनभूगोलवर्णनाद् भिन्नं दृश्यते। आधुनिकवैज्ञानिकानामनुसारेणेदं वर्णनं समीचीनं नास्ति। अस्माकं पृथिवी परिवर्तनशीलाऽस्ति। अस्यां पृथिव्यां कालक्रमानुसारं सदैव परिवर्तनं जायते। भूमौ अनेकानि भौगोलिकपरिवर्तनानि सम्प्रति अपि जायमानानि दृश्यन्ते। अतः पौराणिकवर्णनानुसारं यत्किमपि वर्णनं प्राप्यते तस्मिन्नपि वर्णने भौगोलिकपरिवर्तनं भवितुं शक्नोतीति। आधुनिकसन्दर्भे पृथिव्यां पुराणेषूपलभ्यमानानां सप्तद्वीपानां स्थितिः सम्प्रति कुत्रास्तीति विषयेऽस्मिन् अनेकानां विचारकानां विभिन्नानि मतानि सन्ति। अस्मिन् सन्दर्भे आधुनिक-भौगोलिकपरिस्थितौ एतेषां सहसम्बन्ध विषये अनेकानां विचारकाणां विभिन्नानि मतानि प्राप्यन्ते।

जम्बूद्वीपवर्णनम्

अस्मदीया पृथिवी गोलाकारास्ति तस्याः भागद्वये विभाजनं क्रियते[2]। तयोर्गोलयोः प्रथमम् उत्तरीगोलार्धं द्वितीयञ्च दक्षिणीगोलार्धं कथ्यते। अनयोर्गोलयोर्मधये शून्याक्षांशरेखा विषुवद्रेखा कथ्यते। इयं रेखा आकाशीयनाडीवृत्तस्य समानान्तरा भवति। अस्या उत्तरदिशि उत्तरगोलीयप्रदेशाः दक्षिणे च दक्षिणगोलीयप्रदेशाः कथ्यन्ते। प्राचीनभारते भूगोलस्योत्तरीगोलार्धं जम्बूद्वीपनाम्ना प्रसिद्धमासीत्[3]। तत्र जम्बूद्वीपः नववर्षेषु विभक्तो वर्तते[4]। समराङ्गणसूत्रधारे जम्बूद्वीपस्य विलक्षणं वर्णनं समुपलभ्यते तदनुसारं सप्तद्वीपेष्वयं जम्बूद्वीपः सप्तसमुद्राणां मध्ये शतसहस्रयोजनविस्तृततमो वर्तते। जम्बूद्वीपे **''हिमाद्रिः हेमकूटः निषधः नीलः श्वेतः शृंङ्गी''** संज्ञका षड्पर्वतश्रेण्यः सन्ति[5]। अस्मिन्द्वीपे नववर्षाणि सन्ति तेषु नववर्षेषु अस्माकं भारतवर्षमपि विद्यते[6]। अस्मिन् जम्बूद्वीपमध्ये महान् जम्बूवृक्षो विद्यते अनेनैव कारणेनायं जम्बूद्वीपनाम्ना प्रसिद्धोऽस्ति[7]। अपराजितपृच्छायाञ्चापि द्वीपस्यास्य विस्तृतिः समराङ्गणसूत्रधारसमैवास्ति। द्वीपस्यास्य बहिः

---

1. माहेन्द्रो मलयश्चैव सह्यो विन्ध्यस्तथैव च।
   हेमन्तः पारिजातश्च श्रीशैलश्च तथाऽर्बुदः।।
   उदयाद्रिस्त्रिकूटश्च द्वीपशैलो विन्ध्याचलः।। अपराजितपृच्छा 4.29-30
2. भूगोलोऽयं द्विधा विभक्तो विद्यते सौम्ययाम्ययोर्विभागेन-भुवनकोशविमर्शः पृ. 119
3. भुवनकोशविमर्शः पृ.121
4. सिद्धान्तशिरोमणि गो.भु श्लो. 26-30 । महाभारतम् उद्योगपर्वः 19.15-16
5. समराङ्गणसूत्रधारः 5.9-10
6. समराङ्गणसूत्रधारः 5.28
7. जम्बूतरुर्महान् मध्ये सुमेरोर्निषधस्य च ।
   द्वीपस्यामुष्य यद्योगाज्जम्बूद्वीप इति श्रुतिः ।। समराङ्गणसूत्रधारः 5.20

क्रमशः सप्तसमुद्राणां सृष्टिः जायते[1]। अस्य द्वीपस्य नवखण्डाः सन्ति। जम्बूद्वीपे सप्तपर्वताः सन्ति तेषु सप्तपर्वतेषु मेरुपर्वतः प्रसिद्धोऽस्ति। केषाञ्चन मतानुसारेण अयमेव मेरुः सम्प्रति **'पामीर'** इति स्थानविशेषनाम्ना ज्ञायते। अस्य मेरोः चतुर्दिक्षु चतस्रः पर्वतशृङ्खलाः निर्गताः सन्ति। मेरुं परित **'इलावृत्तवर्षस्य'** स्थितिरस्ति। मेरोः पूर्वदिशि **'भद्राश्ववर्षम्'** वर्तते। सम्प्रति **'भद्राश्ववर्षं चीनदेशः'** नाम्ना ज्ञायते। अस्य मेरोः पश्चिमदिशि **'केतुमालवर्षम्'** अस्ति। इदमेव पौराणिकं **'केतुमालवर्षं'** सम्प्रति ईरानइराक-अरबदेशाः सन्तीति मन्यते। मेरोः दक्षिणदिशि **'भारतवर्षं किन्नरवर्षं हरिवर्षञ्च'** सन्ति। तस्मादुत्तरदिशि **'रम्यकवर्षम् हिरण्यवर्षम् कुरुवर्षञ्चेते'** नवखण्डाः जम्बूद्वीपे स्थिताः सन्ति[2]। सम्प्रति पौराणिकं **'किन्नरवर्षम्'** आधुनिकः तिब्बतदेशः **'हरिवर्षञ्च'** हिरातदेशः। रम्यकवर्षस्याधुनिकनाम मध्यएशिया हिरण्यवर्षञ्च उत्तरी सिक्यांगः नाम्ना ज्ञायते[3]। सम्प्रति उत्तरकोरियादेशः उत्तरकुरुवर्षं भवितुं शक्यते। जम्बूद्वीपवर्णनं सर्वेषु पुराणेषूपलभ्यते परञ्चायं विवेचनं पृथक्-पृथक् वर्तते।

जम्बूद्वीपः सम्प्रति केचन आधुनिकवैज्ञानिकैः **'यूरेशिया'** पदेन संज्ञायते[4]। **'यूरेशिया'** पृथिव्याः बृहत्तमं महाद्वीपीयक्षेत्रमस्ति। अस्मिन् महाखण्डे **'यूरोप-एशिया'** इति द्वौ महाद्वीपौ वर्तेते। द्वयोः महाद्वीपयोः सम्मेलनेनायं **'यूरेशिया'** इति कथ्यते[5]। अयं मुख्यरूपेण पृथिव्या उत्तरीगोलार्धे स्थितोऽस्ति। अस्य पश्चिमदिशि **'अटलांटिकमहासागरः'** पूर्वदिशि **'प्रशान्तमहासागरः'** उत्तरदिशि **'आर्कटिकमहासागरः'** दक्षिणदिशि च **'अफ्रीकामहाद्वीपः भूमध्यसागरः हिन्दमहासागरश्चेति'** सन्ति[6]। जम्बूद्वीपे **''हिमाद्रिः हेमकूटः निषधः नीलः श्वेतः शृङ्गी''** संज्ञका षट्पर्वतश्रेण्यः सन्ति[7]। तेषाञ्च वर्णनं क्रियते।

हिमवान् पर्वतः

हिमवान् पर्वतः सम्प्रति हिमालयपर्वतनाम्ना विख्यातः। समराङ्गणसूत्रधारे वर्णितं यद् हिमशिलाच्छादित उच्चशिखरैः सुशोभितश्च **'हिमवान्'** पर्वतः। अत्र पिशाचाः यक्षगणाः

---

1. जम्बूद्वीपो लक्षमेकं योजनानां तु सङ्ख्यया।
   तत्परमर्णवा जाताः सप्तसृष्टिविराजिताः।।
   सालश्च सप्तमां यान्ति क्रमेणापि सुसंस्थिताः।
   क्षारार्णवक्रमेणैव संस्थिताः सप्त सागराः।। अपराजितपृच्छा 4.20-21
2. भौगोलिक विचारधाराएं एवं विधितन्त्र पृ.141-145
3. भुवनकोशविमर्शः पृ.130
4. भौगोलिक विचारधारायें एवं विधितन्त्र पृ.141-145 (उद्धृतं भुवनकोशविमर्शे पृ.130)
5. How Many Continents are there\ National Geographic Society.
6. What is Euresia\ www-geography-about-com- Retrieved 17 Dec 2012
7. समराङ्गणसूत्रधारः 5.9-10

राक्षसाश्च निवसन्ति[1]। पुराणेषु हिमालये देवादीनां निवासः स्वीकृतः। कालिदास अपि कुमारसम्भवे देवतात्मा हिमालयः इति कथयति, यथा–

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः[2]।

हेमकूटपर्वतः

पर्वतोऽयं हेमकूटः स्वर्णशिखरयुतोऽस्ति। अत्र चारणाः गुह्यकाश्च (देवयोनिविशेषः) सदैव विचरन्ति[3]। केचन विद्वांसः लद्दाखकैलाशपर्वतस्य शृङ्खला हेमकूट इति कथयन्ति[4]।

निषधाचलपर्वतः

प्रातः कालीनतरुणसूर्यस्य प्रभामण्डलसदृश अरुणवर्णयुतश्च **'निषधाचलः'** वर्तते। पर्वतेऽस्मिन् शेषनागः वासुकिः तक्षकगणाश्च निवसन्ति[5]। अलीमहोदयस्य मतानुसारं निषध पर्वतशृंखला चीनदेशस्य 'कुनलुन' पर्वतशृंखलाऽस्ति। महाभारतानुसारं निषधपर्वतं पर्यन्तं महाराजयुधिष्ठिरस्य शासनम् आसीत्[6]।

नीलपर्वतः

वैडूर्यमणिमयशिखरयुतः **'नीलपर्वतः'** विद्यते। अनेनैव कारणेनायं विश्वप्रसिद्ध अस्ति। अत्र **'नीलपर्वते'** तपोनिष्ठाः ब्रह्मर्षिगणाः निवसन्ति[7]। सम्भवतः जफरसेनतियेनसेनपर्वतमाला (सोवियतदेशः) नीलपर्वतः[8]। प्रो.त्रिपाठीमहाभागः 'त्यानशेन' पर्वतमेव नीलपर्वत इति स्वीकरोति[9]।

श्वेतपर्वतः

अस्मिन् पर्वते स्वर्णमयाः उच्चोच्चशिखराः विद्यन्ते। तत्र **'श्वेतपर्वते'** दर्पशालिनः देवद्रोहिणः च निवसन्ति[10]। अफगानिस्तानदेशस्य नगरहारप्रान्तस्य दक्षिणस्थितः **''सफेदकोह''** इति संज्ञिका पर्वतशृङ्खला **''श्वेतपर्वतः''** सम्भाव्यते।

---

1. शृङ्गैर्हिमशिलानद्धैः सर्वतो हिमवानयम् ।
   महान्तो निवसन्त्यत्र पिशाचाः यक्षराक्षसाः ।। समराङ्गणसूत्रधारः 5.21
2. कुमारसम्भव 1.1.
3. कूटैर्हेममयैर्हेमकूट इत्यवनीधरः । यं सर्वतो निषेवन्ते सदा चारणगुह्यकाः ।। समराङ्गणसूत्रधारः 5.22
4. भुवनकोशविमर्शः पृ. 134
5. तरुणार्कप्रभाजालप्रतिभो निषधाचलः। निवसन्ति सुखं तत्र शेषवासुकितक्षकाः ।। समराङ्गणसूत्रधारः 5.23
6. भुवनकोशविमर्शः पृ.133
7. वैडूर्यनद्धैः शिखरैर्नीलो नीलमहीधरः ।
   कलयन्ति तपोनित्या यत्र ब्रह्मर्षयः स्थितितम् ।। समराङ्गणसूत्रधारः 5.25
8. भुवनकोशविमर्शः पृ.133
9. तत्रैव
10. श्वेतः स काञ्चनैः श्रृङ्गैर्गगनोल्लेखिभिर्वृतः ।
    दोर्दर्पशालिनां यत्र निवासस्त्रिदशद्विषाम् ।। समराङ्गणसूत्रधारः 5.26

शृङ्गवान् पर्वतः

शृङ्गवान्पर्वते महानीलमयूराणाम् आधिक्यं वर्तते। उच्चशिखरयुतश्चायं **'शृङ्गवान्'** पर्वतः पितृणां निवासस्थलम् अस्ति[1]। अस्य साम्प्रतिकस्थितिः सोवियतदेशस्य आसन्नेष्वेव सम्भाव्यते।

जम्बूद्वीपस्य नववर्षाणि

अत्र **इलावृत्तवर्षं भद्राश्ववर्षं केतुमालवर्षं रम्यकवर्षं हिरण्यमयवर्षम् उत्तरकुरुवर्षं हरिवर्षं किन्नरवर्षं भारतवर्षञ्चेति** नववर्षाणि सन्ति। तेषाञ्च वर्णनं यथा –

इलावृत्तवर्षवर्णनम्

''इरया आवृतं इलावृत्तं जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेष'' इति शब्दकल्पद्रुमे[2]। नववर्षात्मकजम्बूद्वीपस्य वर्षभेदे तच्च वर्षम् **''पश्चान्माल्यवतः प्राच्यां गन्धमादनशैलतः। इलावृतं निलगिरेर्याम्यो निषधादुदक्''** इत्युद्र चतुः सीमावच्छिन्ने देशोऽस्ति[3]। जम्बूद्वीपमधये **'सुमेरुपर्वतः'** विराजते। अयं पर्वतः स्वर्णकमलकर्णिकाकारो वर्तते। अस्मिन् पर्वते नैके मणियुताः कन्दराः सन्ति। तत्र **'मेरुपर्वते'** कन्दरेषु अप्सरैः सह देवगणाः निवसन्ति[4]। आधुनिकाः मेरुः 'पामीर' इति स्थानविशेषनाम्ना जानन्ति[5]। पर्वतमिमं परित **'इलावृत्तवर्षम्'** अस्ति।

वर्षस्यास्य **'इलावृत्तस्य'** स्थितिः समराङ्गणसूत्रधारेण **'निषधाचल-नीलाद्रि-माल्यवान्-गन्धमान'** इत्यादीनां पर्वतानां मधये कथिता[6]। **'भुवनकोशविमर्शे'** च वर्णितमस्ति यत् सुमेरुं परितः **'कदम्बवृक्षः जम्बूवृक्षः वटवृक्षः पिप्पलवृक्षः'** चेति चत्वारो वृक्षाः **'मदरांचलः सुगन्धः विपुलः सुपार्श्वः'** चेति चत्वारः शैलाः **'चैत्ररथः नन्दवनः धृतवनः बैभ्राजवनः'** चेति चत्वारि वनानि **'अरुणसरः मानससरः महाह्रदसरः श्वेतजलसरश्च'** इति चतस्रः सरांसि सन्ति। एतानि सर्वाणि **'इलावृत्तवर्षे'** स्थितानि सन्ति[7]।

भद्राश्ववर्षवर्णनम्

''भद्रा अश्वा अत्र भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेष'' इति शब्दकल्पद्रुमे[8]।

---

1. महानीलमयो बर्हिपिच्छच्छायो बहिर्महान् ।
   पितृणामालयः शृङ्गैरुच्छ्रितैः श्रृङ्गवान् गिरिः ।। समराङ्गणसूत्रधारः 5.27
2. शब्दकल्पद्रुमः
3. वाचस्पत्यम्
4. हेमाब्जकर्णिकारः सुमेरुर्मणिकन्दरः ।
   अत्रामराः साप्सरसस्त्रयस्त्रिंशद् वसन्ति ते ।। समराङ्गणसूत्रधारः 5.24
5. भुवनकोशविमर्शः पृ.130
6. निषधाचलनीलाद्रि माल्यवद्गन्धभूभृताम्।
   चतुर्णां मध्यगं वर्षं तुर्यमस्मिन्निलावृतम्।। समराङ्गणसूत्रधारः 5.31
7. भुवनकोशविमर्शः पृ.132
8. शब्दकल्पद्रुमः

इदं भद्राश्ववर्षं मेरोः पूर्वदिशि स्थितमस्ति[1]। नीलाचलनिषधाचलपर्वतयोर्मधयभागे माल्यवान् पर्वतस्य च पूर्वभागे समुद्रपर्यन्तं भूखण्डं भद्राश्ववर्षं कथ्यते[2]। आधुनिकैः वैज्ञानिकै अनुसारेण वर्षेऽस्मिन् पूर्व-एशियामहाद्वीपस्य भूभागाः समागच्छन्तीति[3]। पूर्वीएशियाभूखण्डे स्थित आधुनिकचीनदेशः इदमेव भद्राश्वर्षम् भवितुं शक्यते।

केतुमालवर्षम्

''जम्बूद्वीपस्य नवखण्डान्तर्गतखण्डविशेष'' इति शब्दकल्पद्रुमे[4]। गन्धमादनपर्वतस्य पश्चिमभागे समुद्रस्य च पूर्वभागे इदं **'केतुमालवर्षं'** विद्यते इति समराङ्गणसूत्रधारे वर्णितमस्ति[5]। इदमेववर्णनं **'भास्करीयगोलमीमांसायाम्'** अपि प्राप्यते[6]। मेरु-इलावृत्तयोः पश्चिमे **'केतुमालवर्षम्'** स्थितमस्ति। इलावृत्तकेतुमालवर्षयोः मधये विभाजकः गन्धमादनपर्वतो वर्तते। अस्मिन्नैव गन्ध मादनपर्वते कामदेवो वसतीति मन्यते। केतुमालवर्षस्योत्तरे **'नीलगिरिः'** पर्वतः पूर्वभागे च **'गन्धमादनपर्वतः'** दक्षिणे च **'निषधाचलपर्वतः'** पश्चिमपार्श्वे च महासागरो वर्तते।

रम्यकवर्षम्

इलावृत्तवर्षस्योत्तरे नीलशुक्लपर्वतयोर्मधये च **'रम्यकवर्षम्'** इत्यस्य स्थितिर्वर्तते[7]। वर्षमिदं नीलाचलपर्वतस्योत्तरदिशि श्वेताचलपर्वतस्य च दक्षिणदिशि स्थितमस्ति[8]। **'रम्यक-इलावृत्तवर्षयोः'** विभाजकः **'नीलाचलः'** पर्वतो वर्तते। श्रीमद्भागवतपुराणे उक्तञ्च - **'उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति'**[9]।

हिरण्यमयवर्षम्

वर्षमिदं हैरण्यकनाम्नाऽपि ज्ञायते। शुक्लाचलश्रृङ्गाचलपर्वतयोर्मधये **'हिरण्यमयवर्षम्'** वर्तते[10]। इदं वर्षं सुमेरुपर्वतस्योत्तरदिशि स्थितमस्ति। वर्षस्यास्य पूर्वपश्चिमयोश्च उभयोः दिशोः क्षारसागरो विद्यते[11]।

---

1. भास्करीयगोलमीमांसा पृ.55
2. अन्तरा नीलनिषधौ प्राग्भागे माल्यवद्गिरेः ।
   भद्राश्वमष्टमं वर्षं प्राक्समुद्रान्तमीरितम् ।। समराङ्गणसूत्रधारः 5.35
3. भुवनकोशविमर्श पृ. 133
4. शब्दकल्पद्रुमः
5. गन्धमादनशैलस्य प्रत्यक् प्राक् चापराम्बुधेः ।
   नवमं वर्षमाचार्याः केतुमालं प्रचक्षते ।। समराङ्गणसूत्रधारः 5.36
6. भास्करीयगोलमीमांसा पृ.55
7. भास्करीयगोलमीमांसा पृ.55
8. उत्तरे नीलशैलस्य याम्ये च श्वेतभूभृतः ।
   पञ्चमं वर्षमत्यर्थरम्यं रम्यकसंज्ञितम् ।। समराङ्गणसूत्रधारः 5.32
9. उद्धृतं भुवनकोशविमर्शे पृ.133
10. श्वेतशृङ्गवतोः शैलराजयोरनयोरिह ।
    मध्ये षष्ठं हिरण्यांशुरम्यं हैरण्यकाह्वयम् ।। समराङ्गणसूत्रधारः 5.33
11. श्रीमद्भागवत का सांस्कृतिक अध्ययन पृ.260-282 (उद्धृतं भुवनकोशविमर्शे)

उत्तरकुरुवर्षम्

उत्तरकुरुवर्षं कुरुवर्षनाम्नाऽपि ज्ञायते। वर्षमिदं जम्बूद्वीपस्योत्तरदिशि विद्यते। अनेन एवेदं उत्तरकुरुवर्षम् इति नाम्ना जानीते। याम्यदिशं विहाय अस्य वर्षं परितः सर्वत्र क्षारसागरो विद्यते[1]। समराङ्गणसूत्रधारे च वर्षस्यास्यस्थितिः **'शृङ्गाचल'** पर्वतस्योत्तरभागे **'क्षारसमुद्रस्य'** च दक्षिणभागे विद्यते[2]। श्रीमद्भागवतानुसारेण अत्रैव भगवान् विष्णुः वराहरूपेण निवसति स्म[3]। सम्प्रति एशियाप्रदेशस्य सौम्यभागः **'उत्तरकुरुवर्षं'** भवितुं शक्यते। श्री अलीमहोदयानुसारेण प्राच्यसाइबेरियानामकप्रदेश एवोत्तरकुरुवर्षमस्तीति[4]।

हरिवर्षम्

इलावृत्तवर्षस्य दक्षिणे निषधाचलहेमकूटपर्वतयोर्मध्ये **'हरिवर्षं'** विद्यते[5]। पौराणिकवर्णनानुसारं हेमकूटपर्वतस्योत्तरदिशि अयं प्रदेशः स्थितोऽस्ति। अत्र भगवतः नृसिंहरूपं निवसतीति श्रीमद्भागवतानुसारेण। केचन विद्वांसः हेमकूटपर्वतं **'लद्दाख-कैलाशपर्वतशृङ्खला'** इति स्वीकुर्वन्ति। पौराणिकवर्णनानुसारेणायं हिमालयस्योत्तरभागे निषध आधुनिक **'कुनलुन'** पर्वस्य च याम्यदिशि स्थितप्रदेशो वर्तते। अयं प्रदेशः चीनदेशस्य दक्षिणक्षेत्रं यावत् विस्तृतोऽस्ति। महाभारतकाले दिग्विजयार्थं पाण्डुपुत्र अर्जुन अस्मिन्नैव वर्षे गतवानासीत्[6]।

किन्नरवर्षम्

वर्षमिदं किम्पुरुषवर्षनाम्नाऽपि ज्ञायते। इदं **'किन्नरवर्षं'** हिमालयहेमकूटपर्वतयोर्मध्ये स्थितमस्ति[7]। अस्य वर्षस्य दक्षिणदिशायां **'हेमकूटपर्वत'** उत्तरे च **'हिमवान्'** पर्वतो वर्तते। अस्य प्राच्यप्रतीच्यदिशोः क्षारसमुद्रः स्थितोऽस्ति। अत्र रामभक्तः हनुमान् निवसति। हिमालयस्योत्तरभागे इदं **'किन्नरवर्षं'** विद्यते। वर्तमाने इदं **'किन्नरवर्षं'** लद्दाख-तिब्बतक्षेत्रमस्तीति मन्यते[8]।

भारतवर्षम्

जम्बूद्वीपस्य दक्षिणदिशि **'भारतवर्षं'** स्थितमस्ति। वर्षमिदं हिमालयस्य दक्षिणभागे

---

1. भास्करीयगोलमीमांसा पृ.56
2. अस्योत्तरे च याम्ये च क्षारवारिधेः ।
   कुरुवर्षाभिधं वर्षमुत्तरेण प्रचक्षते ।। समराङ्गणसूत्रधारः 5.34
3. श्रीमद्भागवतम् 5.16.8 । तत्रैव 5.18.34 (उद्धृतं भुवनकोशविमर्शे)
4. भुवनकोशविमर्शः पृ.134
5. अन्तरे हेमकूटस्य निषधस्य च भूभृतः।
   हरिवर्षमिति प्रोक्तं तृतीयं वर्षमुत्तमम् ।। समराङ्गणसूत्रधारः 5.30
6. भुवनकोशविमर्शः पृ.134
7. तुषारनिलयस्याद्रेर्हेमकूटाचलस्य च ।
   मध्ये किंपुरुषं नाम द्वितीयं वर्षमीरितम् ।। समराङ्गणसूत्रधारः 5.29
8. श्रीमद्भागवत का सांस्कृतिक अध्ययन पृ. 260-282 (उद्धृतं भास्करीयगोलमीमांसायां पृ.56)

समुद्रपर्यन्तं धनुषाकृतिरिवास्ति[1]। भारतवर्षस्य उत्तरदिशं विहाय इमं परितः सर्वत्र क्षारसागरो वर्तते। अस्योत्तरभागे **'हिमवान्'** पर्वतो विद्यते। महाभारतानुसारं दुष्यन्तपुत्रस्य भरतस्य नाम्ना एवास्य वर्षस्य नाम **'भारतवर्षं'** बभूव[2]। पुराणेषु अस्य वर्षस्य नाम **'अजनाभवर्षम्'** अपि प्राप्यते[3]। कालान्तरे भरतस्य नाम्ना एवास्य वर्षस्य नाम **'भारतवर्षं'** बभूव। भारतवर्षस्य विवेचनं भास्कराचार्येण **'सिद्धान्तशिरोमणौ'** अपि विशदरूपेण कृतमस्ति। तत्र भारतस्य ऐन्द्रादीनां नवभागानां विवेचनं प्राप्यते तेषु नवभागेषु पर्वतानां स्थितिरपि प्रदर्शिता वर्तते[4]।

जम्बूद्वीपस्य प्रमुखाः नद्यः

श्रीमद्भागवतमहापुराणानुसारेण जम्बूद्वीपे प्रामुख्येण **'सीता चक्षुः भद्रा अलकनन्दा'** चेति चतस्रो नद्यः प्रसिद्धाः सन्ति। विष्णुपादोद्भवा **'गङ्गा'** ब्रह्मकमण्डलात् मेरौ पतिता। तत्र पतितायाः गङ्गायाः धारा चतसृषु दिक्षु विभाजिता बभूव। सा एव गङ्गा **'सीता'** नाम्ना पूर्वदिशि **'चक्षुः'** नाम्ना उत्तरस्यां दिशि **'भद्रा'** नाम्ना प्राच्यां दिशि **'अलकनन्दा'** नाम्ना च दक्षिणदिशि प्रसिद्धा अस्ति[5]। अस्मिन्सन्दर्भे विभिन्नानि मतमतान्तराणि अपि समुपलभ्यन्ते।

'गङ्गा' त्रिपथगा भूत्वा पूर्वदिशि **'सीता'** नाम्ना पूर्वसमुद्रपर्यन्तं प्रवहतीति। **'सीता'** मेरोः पूर्ववाहिनी धारा वर्तत इति। पौराणिकभौगोलिकसन्दर्भे वर्णनमस्ति[6]। अलीमहोदयस्य मते इयमेव **'सीता'** नदी सम्प्रति **'किजित्सुनदी'** वर्तते[7]। **'चक्षुः'** माल्यवान्केतुमालवर्षाभ्यां भ्रमन्ती प्राच्यां दिशि समुद्रपर्यन्तं प्रवहति[8]। **'भद्रा'** नदी **'भद्रशोभा'** नाम्नाऽपि प्रसिद्धाऽस्ति। इयं **'उत्तरकुरुवर्षं'** स्पृशवती उत्तरस्यां दिशि समुद्रपर्यन्तं प्रवहति[9]। **'अलकापुरी'** नगर्याः समीपे **'अलकनन्दा'** वहति। इयञ्च **'अलकनन्दा'** हेमकूटहिमालयपर्वताभ्यां भारतवर्षं प्रति प्रवाहिता अस्ति[10]।

---

1. हिमाचलस्य याम्येन क्षाराब्धिवृतमन्यतः। वर्षं स्याद् भारतं नाम प्रथमं कार्मुकाकृतिः ॥ समराङ्गणसूत्रधारम् 5.28
2. शकुन्तलायां दुष्यन्ताद् भरतश्चापि जज्ञिवान् ।
   यस्य लोके सुनाम्नेदं प्रथितं भारतं कुलम् ॥ महाभारतम् अ.प.74.131 (उद्धृतं भुवनकोशविमर्शे पृ.135)
3. अजनाभं नामैतद्वर्षं भारतमिति यद् आरभ्य व्यपदिशन्ति । श्रीमद्भागवतम् 5.17.3 (उद्धृतं भास्करीयगोलमीमांसायाम्)
4. ऐन्द्रं कशेरुशकलं किल ताम्रपर्णमन्यद्गभस्तिमदतश्च कुमारिकाख्यम् ।
   नागं च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्वसंज्ञमिति भारतवर्षमधये ॥
   वर्णव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजना निवसन्ति सर्वे ।
   माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः सह्यः सविन्धय इह सप्त कुलाचलाख्याः ॥ सिद्धान्तशिरोमणिः गो.भु. 42
5. तत्र चतुर्धा विद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यदन्ती नदनदीपतिमेवाभिर्निविशति सीताऽलकनन्दाचक्षुर्भद्रेति । श्रीमद्भागवतम् 5.17.5 (उद्धृतं भास्करीयगोलमीमांसायाम् पृ.60)
6. पुराणपरिशीलनम् पृ.326
7. श्रीमद्भागवत् का सांस्कृतिक अधययन । गङ्गा प्रकरण (उद्धृतं भुवनकोशविमर्शे पृ.140)
8. पुराणपरिशीलनम् पृ.326
9. श्रीमद्भागवतम् 5.17.8 (उद्धृतं भास्करीयगोलमीमांसायाम् पृ.61)
10. श्रीमद्भागवतम् 5.19.18

जम्बूद्वीपस्य स्थितिः लङ्कादेशतः ध्रुवनिरक्षदेशात्ऋ उत्तरे 180^0 पर्यन्तं स्वीकृतमस्ति। अस्मिन् जम्बूद्वीपे भारतदेशस्य हिमवत्पर्वतस्य चावस्थितिः सम्प्रत्यपि प्राप्यते। अन्यदेशानां पर्वतानाञ्च यद्वर्णनं जम्बूद्वीपान्तर्गतं तत्र समुपलभ्यते तेषां कालप्रवाहवशात्सम्प्रतिस्थितिः सम्यग्रूपेण नावगम्यते। यतः पुराणादिषु यद्वर्णनं तत्तु न्यूनतमं 1500 वर्षपूर्वस्य अस्ति। सम्प्रति तेषां नामानि परिवर्तनानि अथवा भौगोलिकसंरचनायां किञ्चिदन्तरमपतत्। अनेन तत्रोक्ताः देशपर्वतादयः वस्तुतः समीचीनाः सन्ति न वेति यक्षप्रश्नः। किं ते भारतदेशीयाः आचार्याः केवलमेतेषां देशपर्वतनगरादीनां परिकल्पनां कृतवन्तः? अस्मिन् विषये किमपि स्पष्टरूपेण कोऽपि न वक्तुं प्रभवति। तत्रोक्तानां देशपर्वतादीनां वर्तमानेऽवस्थितिज्ञानार्थं अर्वाचीनाचार्याः प्रयत्नं कृतवन्तः परन्तु मतवैभिन्यात् परिकल्पनत्वाच्च स्पष्टरूपेण तेषां स्थितिः नाभिज्ञायते। अत्राश्चर्यजनकं यत् 'सप्तद्वीपा वसुन्धरेति' प्राचीनाचार्याणां यदभिमतमासीत्तत्तु किञ्चिद्भिन्नस्वरूपे सम्प्रत्यपि परिलक्ष्यते। नैके विद्वांसः सम्प्रति सप्तमहाद्वीपाः एशिया-यूरोप-अफ्रीका-आस्ट्रेलिया-उत्तरीअमेरिका-दक्षिणीअमेरिका-अंटार्कटिका इति स्वीकुर्वन्ति। अतः अद्यापि 'सप्तद्वीपा वसुन्धरेति'।

जयसिंहनिर्मापितस्य जयपुरनगरस्य वास्तुशास्त्रीयाध्ययनम्

डॉ. प्रवेशव्यासः
श्रीकृष्णचन्द्रशर्मा

भारतदेशे राजस्थानप्रदेशे च बहूनि प्राचीननगराणि वर्तन्ते। तत्र प्रत्येकं नगरं वास्तुशास्त्रदृष्ट्या विशिष्टमस्ति। एतादृशमेव नगरमेकं वर्तते जयपुरम्। नगरमिदं राजस्थानप्रदेशस्य राजधानीत्वेन विलसति। जयपुरनगरस्य स्थापनाकाले भारते केन्द्रीयसत्तायाः वशं पूर्णरूपेण सञ्जातमासीत्। अनेन राजनैतिकरिक्ततया सह सांस्कृतिकरिक्तताऽपि समुत्पन्ना। तां सांस्कृतिकरिक्ततां परिपूर्णाय आम्बेरनृपेण एतादृशी प्राक्कल्पना चिन्तिता येन सः सांस्कृतिकभूभागे सर्वोच्चस्थाने प्रतिष्ठापयितुं शक्नुयात्। आमेरराज्यस्य पूर्वीभागे जाटशासकानाम् अभ्युदयः आमेरप्रदेशाय चिन्ताप्रद आसीत्। यद्यपि मुगलसाम्राज्यान्तर्गतत्वेनैव जाटशासकाः सक्रिया आसन्। वकीलरिपोर्टानुसारं[1] राजारामसिंहप्रथमस्य काले जाटशासकाः आमेरराज्याय संकटप्रदाः सञ्जाता आसन्। अतः मुगलादेशानुसारं रामसिंहस्य पुत्रः विशनसिंहः 1688 तमे ईस्वीयवत्सरे जाटजनैः सह युद्धाय उद्यतः परन्तु पराजयम् अवाप्नोत्।[2] विशनसिंहस्य असामयिकमृत्योरनन्तरं सवाईजयसिंहः सिंहासनारुह्य जाटयुद्धाभियानद्वयमकरोत्। प्रथमाभियाने पराजितो भूत्वा 1722 तमे वत्सरे द्वितीयाभियाने विजयम् आप्नोत्।[3] विजयोपरान्तं जयसिंहः दिल्लीनगरं गत्वा वेधशाला विजयस्मृतित्वेन निर्मापयितुम् अचिन्तयत्। परन्तु अनेन कार्येण तस्य सन्तुष्टिः न जाता। अतः नगरनिर्माणाय तस्य मनसि विचारः स्फुटितः।

जदुनाथसरकारः जयपुरस्य इतिहासः इत्यस्मिन् पुस्तके प्रतिपादयति–धूनविजयोपरान्त जयसिंहः चत्वारि वर्षाणि यावत् गङ्गास्नान–बृजपरिक्रमा, दिल्लीनगरे वेधशालानिर्माणम्, आमेरराज्ये जयनिवासप्रासादनिर्माणे च व्यस्तो अभवत्।[4] यद्यपि जयपुरनिर्माणप्रक्रिया 1725 तमे ईस्वीयवत्सरेणैव प्रारम्भा। परन्तु अस्य विधिवत् शिलान्यासः 1727 तमे वत्सरे नवंबरमासस्य अष्टादशतमे दिनाङ्के 1784 तमे विक्रमसंवत्सरे पौषमासस्य कृष्णप्रतिपदायां[5] समभवत्।

---

1. केशोरायात् रामसिंहः 1687, राज.राज्य अभिलेखागारः बीकाणा, पृ.– 115।
2. तत्रैव।
3. भरतपुर अपटू 1826, जयपुर–1970, पृ. 26।
4. जदुनाथ सरकार, ए हिस्ट्री आफ जयपुर, पृ. 205।
5. करि असीम विनती करि देहा वेग वसाय। संवत सतरेसो सुनी चौरासी मन लाय।।
   पौषहि सुदि परिवा जहाँ वार सनीसरवरा। गिरधारी या शहर को जनम महा सुभवार।।
   गिरधारीभोजनसार दोहा 190–191।

जयनगरं (जयपुरं) देशस्य सांस्कृतिककेन्द्रनिर्माणाय जयसिंहेन ज्यामितिक-ज्योतिषीय-परम्पराणाम् अध्ययनं प्राप्य तस्याधारेण जयपुरनिर्माणाय योजना परिकल्पिता। यत्र चन्द्रपोल-सूर्यपोल-रामपोल-शिवपोल-किशनपोल-ध्रुवपोलानां निर्माणं जातम्, तस्मिन्नैव अनुपाते तोपखानाहुजूरी-तोपखानादेश-मोदीखाना-विश्वेश्वर-रामचन्द्रचौकडी-गङ्गपोल-सरहदचौ-कडी प्रभृतिषु जयनगरं विभाजितं जातम्। जनसामान्य-व्यापारिकवर्गयोः चन्द्रपोलवीथिविपणि-किशनपोलविपणि-गणगौरीविपणि-त्रिपोलियाविपणि-रामगंजविपणि-सिरहड्योढीविपणीनां निर्माणं कारितम्। अङ्कशास्त्रस्य प्रभावोऽपिदृग्गोचरो भवति नगरेऽस्मिन्। सप्तम-अङ्कस्य महत्ता भारतीयज्योतिषपरम्परानुरूपं जयनगरनिर्माणे दरीदृश्यते। यथा चन्द्रप्रासादः (सिटीपैलेस) सप्ततलीयो वर्तते। सुरक्षादृष्ट्या आमेरपार्श्वे जयगढनिर्माणम्, दक्षिणे हथरोई शिवगढ (मोतीडूंगरी) इत्यनयोः निर्माणं कारितम्। किपलिंगनामकः वैदेशिकः जयपुरम् ''आश्चर्यनगरम्'' इति निगदितवान्। अत्रस्थभवनानां समरूपतां सुन्दरतां च दृष्ट्वा सः सम्मोहितो जातः। ज्योतिषविद्याविशारदेन नृपतिजयसिंहेन निर्मापितं नगरमिदं तत्कालीनसमयस्य भारतीयनगरस्य उत्कृष्टमुदाहरणं वर्तते। अस्य नगरस्य स्थापनायां जयसिंहस्य प्रमुखपरामर्शदाता आसीत् विद्याधरभट्टाचार्यः। तस्य योगदानेन प्रसन्नो भूत्वा तं मन्त्रीपदे प्रतिष्ठापितवान् सवाईजयसिंहः।

नगरनियोजनं प्रति विद्याधरस्य रुचेः ज्ञानं कथमभवत्? अस्मिन् विषये एकः मनोरञ्जको दृष्टान्तः श्रूयते-कथ्यते वा यद् एकस्य राजप्रासादस्य निरीक्षणकाले महाराजाजयसिंहः प्रासादस्य सोपानमानचित्राय आदेशम् अयच्छत् अधिकारीभ्यः। किन्तु कोऽपि अधिकारी सुन्दर-श्रेष्ठमानचित्रं नारचयत्। तदा युवकः विद्याधरः अस्मै कार्याय कटिबद्धो जातः। तेन मोम इत्यनेन सुन्दरं वक्रयुक्तं सोपानमानचित्रं जयसिंहस्य पुरतः प्रदर्शितम्। इदं दृष्ट्वा जयसिंह अतिप्रसन्नो भूत्वा अस्य समुचितशिक्षाम् अकल्पयत्। कालान्तरे यदा जयसिंहः नगरनिर्माणाय चिन्तनमकरोत् तदा तेन निश्चितरूपेण विद्याधरस्य सहायतां स्वीकृतम्[1]। प्रौद्योगिकदृष्ट्या नगरमिदं सर्वाधिकं सुनियोजितं बहुसंरचनायुक्तं च वर्तते। नगरनियोजनसिद्धान्तं वर्तमानकाले जापान-अमरीकादेशस्थनगरेषु नियोजकाः स्थापत्यकलाविदः परिपालयन्ति परन्तु बृहत्संरचनासिद्धान्ताः प्रायः बृहद्भवनेषु एव दृश्यन्ते, परन्तु सम्पूर्णजयपुरनगरे सिद्धान्तस्य परिपालनं कृतं दृश्यते[2]।

जयपुरनगरनियोजनं शिल्पशास्त्रस्य प्राचीनसिद्धान्तोपरि कृतं वर्तते। अस्य नगरीयस्वरूपं निर्माणस्य मापकीयपद्धतिश्च वास्तुकलासिद्धान्ताधारितमस्ति। स्थापत्यविदामनुसारेण जयपुरं एकं स्मारकत्वेन वर्तते। नगरमिदं भारतीयनगरनियोजनस्य स्थापत्यकलायाश्च प्रतीकत्वेन अपि शोभते।[3]

---

1. राज. का सांस्कृतिक इतिहास, असीमकुमारराय, पृ.-41।
2. राज. का सांस्कृतिक इतिहास, असीमकुमारराय, पृ.-33।
3. ए हिस्ट्री अफ जयपुर, जदुनाथसरकार, पृ.- 207।

टिफेन्थैलर (जयसिंहकाले जयपुरागमनम्) महोदयानुसारं- नाहरगढ़पर्वतमालातः अस्य नगरस्य दृश्यम् अत्यन्तं मनोहरं प्रतीयते, नवीनं जयनगरमिदं निश्चितरूपेण भारतदेशस्य प्राचीननगरेषु सर्वाधिकं सुन्दरमस्ति। अस्य मुख्यराजमार्गः बहुविशालः वर्तते यत्र षड्-सप्तवाहनानि सुगमतया आवागमनं कर्तुं शक्नुवन्ति।[1]

विशपहैबरस्य (1824 तमे ईस्वीयवत्सरे जयपुरागमनम्) मतानुसारेण नगरस्य प्राचीरं क्रेमलिननगरवत्[2] वर्तते, अत्रागत्य एवं प्रतीयते यद् अहं मॉस्कोनगरे एवास्मि।

एकः फ्रांसीसी विद्वान् (1832 तमे जयपुरागमनम्) लिखति यद् अस्य मुख्यमार्गेएव मुख्यविपण्यः विद्यमानास्सन्ति। मुख्यमार्गमभितः प्रासाद-देवालय-आवासीयभवनानाम् अधस्थाः आपणास्सन्ति। मुख्यमार्गस्य मध्ये धान्यवणिकानां विशालापणाः विद्यन्ते। एते आपणाः अस्थायिरूपेण निर्मितास्सन्ति। दिल्लीनगरे एकमेव एतादृशं स्थलं वर्तते नाम चांदनी-चौक इति। परन्तु जयपुरे तु एतादृशं दृश्यं सम्पूर्णराजमार्गे दरीदृश्यते। अत्रस्थसामान्यजनानां भवनानि प्रस्तरनिर्मितानि सन्ति। परन्तु धनिकानां आवासे प्रस्तरोपरि श्वेतचूर्णलेपनं (पलस्तर) कृतमस्ति। देवालयाः श्वेतसंगमरमर इति प्रस्तरेण अलंकृताः दृग्गोचराः भवन्ति। अनेन प्रकारेण जयपुरस्य स्थापत्यकला परिष्कृतशैल्याः वर्तते।[3]

जयपुरनगरनिर्माणे समेषां शासकानां विशिष्टमवदानं वर्तते। जयपुरस्य विकासः त्रिभागेषु, प्रथमकालः 1727 तः 1799 ईस्वीयंयावत्, द्वितीयकालः 1800 तः 1835 ईस्वीयंयावत्, तृतीयकालश्च 1836 ईस्वीयवत्सरतः रामसिंहद्वितीयस्य शासनारम्भपर्यन्तमिति, विभक्तः कृतः विद्वद्भिः।[4] महाराजारामसिंहस्य योगदानमपि विशिष्टं वर्तते। यतोहि प्रारम्भिककाले नगरमिदं श्वेतवर्णेन लेपितमासीत्। परन्तु अनेन भूभृता सम्पूर्णनगरं पाटलवर्णेन लेपितं अकारयत्। पाटलवर्णचयनस्य बहुमताः प्रदर्शयन्ति विद्वांसः। प्रथममतानुसारं पाटलवर्ण उदितसूर्यस्य परिचायको वर्तते। यतोहि जयपुरराजवंशः आत्मानं सूर्यवंशी इति स्वीकरोति। अतः पाटलवर्णस्य नगरलेपने चयनं सञ्जातम्। अन्यमतानुसारं पाटलवर्णः राजपूतशौर्यस्य परिचायको वर्तते। केचन् स्वीकुर्वन्ति यद् अवलोकने सुन्दरताकारणात् पाटलवर्णः चितः। तदारभ्य जयपुरं पाटलनगरी इति नाम्ना प्रसिद्धिं लेभे। अनेन एव कारणेन अद्यापि जयपुरं पर्यटकान् आकर्षयति[5]।

जयपुरस्य राजा प्रजाश्च वैष्णवधर्मावलम्बिन आसन्। अतः वैष्णवमतसम्बन्धिताः

---

1. ए हिस्ट्री आफ जयपुर, जदुनाथसरकार, पृ.- 207।
2. रुसदेशे स्थितमिदं सुदृढ़प्राचीरै आवृत्तं वर्तते।
3. राज. का सांस्कृतिक इतिहास, रामपाण्डे, जयपुर-2000, पृ. 59।
4. A History of Jaipur, Asim Kumar Rai.
5. राजस्थान का सांस्कृतिक इतिहास, रामपाण्डे पृ. 59-60।

देवालयाः बाहुल्येन दरीदृश्यन्ते जयपुरे। अत्र राधागोविन्ददेवमन्दिरं जयपुरस्य आराध्यदेवत्वेन वर्तते। शिवालयानां निर्माणमपि मध्ये मध्ये सञ्जातं येषु प्रमुखः ताडकेश्वरमहादेवः विराजते। नगरेऽस्मिन् जैन-मुस्लिम-ईसाईमतावलम्बिनामपि धार्मिकभवन-देवालयादयः सन्ति। यत्र टेऊँरामस्थलं धार्मिकास्थायाः जनकेन्द्रत्वेन वर्तते। उत्तरस्थः गढ़गणेशदेवालयः दक्षिणे मोतीडूंगरीविद्यमानस्थः विनायकदेवश्च अस्याः नगर्य्याः धार्मिकसौहार्दपरम्परायाः द्योतकत्वेन वर्तेते। अनेन साम्प्रदायिकसौहार्दभावेन जयपुरनगरं धार्मिकनगरत्वेन प्रसिद्धमस्ति। प्रारम्भकालादेव जयपुरं सुधीजनानाम् आश्रयस्थलत्वेन वर्तते। सवाईजयसिंहः महाराष्ट्र-कर्णाटक-तमिल-बंगादिप्रदेशेभ्यः विदुषः एकत्रीकृत्य तेभ्यः ब्रह्मपुरी इत्यस्मिन् स्थले वासव्यवस्थाम् अकल्पयत्। अत्रैव सम्राट्जगन्नाथ-पुण्डीरकयोः आवासभवनानि पर्यटकेभ्य औत्सुक्यं जनयन्ति। सम्पूर्णनगरं राजाधिकारीणां मार्गदर्शने निर्मितं जातं तेषु बहूनि भवनानि अद्वितीयानि निर्मितानि सन्ति। येषु पुण्डरीकभवन-नाथूलालभवन-नगरवणिष-भवनानि सुन्दराणि वर्तन्ते। भवन-देवालयान् अलंकारणाय भित्तिचित्रशैली प्रयुक्तास्ति। अनया शैल्या धार्मिकपरम्परा-रीति-सामाजिकजीवनप्रभृतीनां दर्शनं भवति। जीवशैल्या निष्पादिता वस्त्राभूषणकला जयपुरस्य परिचायिका वर्तते। यत्र विभिन्नप्रकारकाणां स्वर्ण-रजताभूषणानि जयपुरस्य धरोहरत्वेन वर्तन्ते। एवञ्च सांगानेर-बगरुनगरं वस्त्रनिर्माणकलायै बहुश्रुतमस्ति। जयपुरं सांस्कृतिकदृष्ट्या एकम् अद्भुतं नगरं वर्तते। अत्र आचरितेषु समेषु पर्वषु विशेषरूपेण गणगौर-तीजपर्वणि महत्वपूर्णे स्तः। **रानी पूजे राजा ने म्हें पूजा म्हारो सुहाग** एतादृशानि गीतानि तीजपर्वणि महिलाभिः गीयन्ते। इदं पर्व सम्पूर्णराजस्थाने सोल्लासेन आचर्यते। जयपुरे गणगौरपर्वणि गणगौरसवारीयात्रा बहुप्रसिद्धा वर्तते। महिलाः गणगौरप्रतिमां निर्मीय वस्त्राभूषणैरलङ्कृत्य पूजां कुर्वन्ति।[1]

जयपुरनगरस्य स्थापत्यकला अपि अद्वितीया वर्तते। राजप्रासादे निर्मिताः कूप-वापी-जलाशयादयः शिल्पदृष्ट्या महत्वपूर्णाः वर्तन्ते। एवञ्च मन्दिरस्थापत्यकला वास्तुकलां प्रतिपादयति। जयपुरस्थापत्य-कलायाः वैशिष्टयमिदं वर्तते यत् कलेयं राजपूतशैल्या सह मुगलशैली-कर्णाटकशैली-बंगालशैलिभिरपि प्रभाविता अस्ति। दिवङ्गतनृपाणां पुण्यस्मृतौ निर्मितगैटोरस्थस्य 'राजपरिवारछतरी' तत्कालीनसंस्कृतिं व्यञ्जयति। सवाईजयसिंहस्य राज्याभिषेकोपरान्तम् अत्र वैदिकयज्ञानामायोजनं प्रारम्भमभवत्। अमुना विंशतिवयसि एव वाजपेययज्ञः समायोजितः। ततः अश्वमेधादियज्ञानायोज्य राजधानीत्वेन नवनिर्मितां जयपुरनगरीं प्रतिष्ठापयामास। एतादृशैः बृहदायोजनैः जयपुरम् अपरा काशी इति नाम्ना प्रथितम्।

जयपुरनगरं निर्माणशैल्याधारे सृष्टेः नवखण्डानि इति सिद्धान्तोपरि नवभागेषु (नव चौकड़ी) विभक्तं वर्तते। नगरमिदं गुलाबीनगरी, भारतस्य पेरिस इति नाम्ना अपि विश्वप्रसिद्धं वर्तते। अस्य मुख्याधारो वर्तते जयनगरस्य सौन्दर्यपूर्णशिल्पम्। अस्य

1. रामपाण्डे, हिस्ट्री एण्ड ग्रोथ ऑफ टूरिज्म जयपुर 2004। पृ. 27

नगरनिर्माणस्य स्वप्नद्रष्टा महाराजसवाईजयसिंहः पं. विद्याधरभट्टाचार्यस्य साहाय्येन सुमुहूर्ते शिलान्यासम् अकरोत् येन जयनगरं कला-उद्योग-शिल्पादिक्षेत्रेषु प्रसिद्धं जातम्। जयपुरस्य नियोजनं विद्याधरेण वृत्ताकार-वर्गाकारयोः शिल्पसिद्धान्तयोराधारोपरि कृतम्। नगरस्यास्य निर्माणं पूर्वनियोजितमानचित्राधारेण सम्पादितम्। अनेन कारणेन भारतीय नगरेषु जयपुरस्य विशिष्टं स्थानं वर्तते।

नगरनियोजनम्-

जयपुरनगरस्य स्थापकस्य कछवाहाराजवंशस्य तत्कालीनमुगलशासकेन सह मधुरसम्बन्ध-कारणात् अस्य नगरस्य निर्माणे न किमपि काठिन्यम् अभवत्। महाराज जयसिंहेन देहली-मथुरा-उज्जैन-जयपुरादिनगरेषु वेधशालाः (जन्तर-मन्तर) निर्मापिताः। ततः अनेन आमेरनगरस्य सविधे नूतननगरनिर्माणाय प्रयासः कृतः यस्मिन् प्रत्येकं भवनानि पूर्णरूपेण वास्त्वनुरूपाणि स्युः, प्रत्येकं राजमार्गः व्यवस्थितः स्यादपि च प्रत्येकं गतिविधि-क्षेत्रं तस्य नाम्ना ख्यातं भवेदिति। एतादृशस्य प्राक्कल्पनायाः सङ्कल्पसिद्धिप्रयासः अस्य मन्त्रिपरिषदि कार्यरतेन विद्याधरेण कृतः। प्रायः इतः पूर्वं कस्यापि नगरस्य निर्माणं अनेन प्रकारेण पूर्वनिर्धारितनगरनियोजनाधारेण न दृश्यते। जयपुरस्य नगरनियोजने तत्कालीनचीनदेशस्थवोटोयानगर - इराकस्थबगदादनगरयोः वृत्ताकार-वर्गाकारपरिमितिजननिवासक्षेत्रयोः अनयोः द्वयोः सिद्धान्तयोरनुपालनं कृतम्। नगरस्य मध्यभागे राजप्रासाद-राजकार्यालयौ स्थापितौ। एका वृहत् सरसी उत्तरभागात् पूर्वभागाच्च अरावलीपर्वतमाला नगरमिदं सुरक्षितं करोति।

जयपुरस्य शिलान्यासः 1727 तमे ईस्वीयाब्दे नवम्बरमासस्य नवविंशत्तमे दिनाङ्के राजपंडितेन जगन्नाथेन कृतः। सर्वप्रथमराजभवनानां केन्द्रीयवृत्तस्य पश्चिमभागस्थलघुचतुष्पटी निर्मिता। ततः राजमार्गनिर्माणं वर्गाकारसिद्धान्ते कृतम्। उत्तरदिशा पर्वतमालाकारणात् सुरक्षादृष्ट्या अत्यन्तमहत्वपूर्णा आसीत्। अतः दुर्गस्य निर्माणम् अस्मिन् पर्वते सुनिश्चितं जातम्। जनावासाय सुरक्षितं उत्तर-पश्चिमस्थानं पूर्वभागे स्थानान्तरितं कृतं येन गलतातीर्थं नगरान्ते समाहितम्। नगरं समीकृत्य जयनिवासः तालकटोरास्थलं च निर्मितम्। पूर्वतः पश्चिमदिशं प्रति समागतः राजमार्गः नगरस्यास्य प्रमुखराजमार्ग अभवत्। पूर्वीभागस्य निर्माणं भूमिं समीकृत्य कृतम्। दक्षिणभागस्थप्राचीरात् तथा च प्रत्येकं स्थले सुरक्षाकेन्द्रकारणात् नगरमिदम् अत्यन्तं सुरक्षितं जातम्। नगरसुरक्षायाम् आमागढ-नाहरगढदुर्गयोः योगदानम् अत्यन्तं महत्वपूर्णं वर्तते, यस्य परीक्षणं मुगल-मराठाक्रमणकाले जातम्। नगरनिर्माणे धार्मिकस्थलानि यथास्थानं प्रतिष्ठाप्य सुरक्षितानि कृतानि। अद्यापि एतानि मन्दिराणि दृग्गोचराणि भवन्ति।

विद्याधरः वर्गाकारसिद्धान्तानुरूपं निर्माणकार्ये बृहद्राजमार्गस्य निवेशं विशिष्टतया अकरोत्। तेन इदं निश्चितं यत् नगरस्य उत्तर-दक्षिणभागापेक्षया पूर्वपश्चिमभाग अधिकः विस्तारयुक्तः स्यात्। नाहरगढ़दुर्गस्य अधोभागे 100 एकड़ परिमितः वनप्रदेश आसीत्। अतः

तत्सविधे एको बृहद्जलाशयः निर्मितः यः तालकटोरा इति नाम्ना प्रसिद्धो जातः।

स्थलमिदं सवाईजयसिंहाय अत्यन्तं प्रियमासीत्। अतः अस्य पार्श्वे एव वेधशालानिर्माण ाय तेन विचारितः। तालकटोरा समीपे एव जयनिवासः नामकः राजप्रासादः निर्मितः। तेन जयनिवासमिदं वृन्दावननगरात् समागतानां जयपुरनगरस्य आराध्यदेवानां गोविन्ददेवानां चरणाविन्देषु समर्पितम्।

गलताराजमार्गः नगरं पूर्वतः पश्चिमभागं प्रति योजयति। अस्य राजमार्गस्य द्वयोः स्थानयोः द्वारद्वयं निर्मापितम्। एते द्वारे सूर्यचन्द्रयोः प्रतीकत्वेन सूर्यपोलद्वारं चन्द्रपोलद्वारञ्च नाम्ना अभिधीयेते। अस्य मार्गस्य मध्यभागे एका नदी प्रवहति स्म। या नगरस्य सौन्दर्यं वर्धयति स्म।

विद्याधरः नगरस्यास्य रूपरेखा नववर्गसिद्धान्तोपरि प्रकल्पितवान्। प्रारम्भे आपणे अलिन्दोपरि टिननिर्मितछर्दिः आसीत्। परन्तु सरमिर्जाकाले तत्स्थाने प्रस्तरनिर्मितालिन्दाः निर्मिताः, येन जनानामावागमने पूर्णतः सौविध्यं जातम्।

मुख्यो राजमार्गः 108 फीटपरिमितो विस्तृतः, अन्यमार्गाणां विस्तारः क्रमशः 54, 26, 13, 6 फीटपरिमित आसीत्। राजमार्गम् अभितः निश्चितमानदण्डाधारितापणास्सन्ति। द्वयोः चतुर्मार्गयोः मध्ये एकषष्ट्यधिकशताधिकापणाः वर्तन्ते। मुख्यराजमार्गम् अभितः भवनानां विस्तारः राजमार्गविस्ताराद् अर्धभागादधिकं न स्वीकृतम्। अनेन प्रकारेण एतेषाम् आपणानां पृष्ठभागस्थभवनानां विस्तारः न्यूनः कृतः। येन प्रत्येकं भवनं समुचितं प्रकाशादिकं प्राप्नुयात्। भवनानां सम्मुखम् एतादृशं निर्मितं येन सूर्यप्रकाशः मुक्तवायुश्च निर्बाधतया समागच्छतः। नगरस्य चतुर्षु भागेषु बृहत्स्तम्भाः, लघुगवाक्षाश्च जयपुरनगरस्य सौन्दर्यं वर्धयन्ति।

तत्र बृहद्भवनानां निर्माणं परिवारसुरक्षायै कृतम्। प्रत्येकं वर्गाकृतिः (चौकडी) लघु-लघु चतुष्के विभक्तासीत्। प्रत्येकं चतुष्के प्रायः चतुश्शतानि गृहाणि आसन्। प्रत्येकं हर्म्ये देवालया आसन्। उत्तरभागस्य चौकडीसरहद इति नाम आसीत्, यत्तु सुमेरुपर्वतस्य प्रतीकत्वेन गृहीतम्। अस्मिन् भागे राजप्रासादानां शासकीयकार्यालयानां निर्माणं कृतम्। नगरस्य भिन्न-भिन्न स्थलानां नामानि चौकडीरामचन्द्रः, गगपोलः, तोपखाना हुजूरी, घाटद्वारम्, चौकडीविश्वेश्वरः, मोदीखाना, तोपखाना इत्यादीनि सन्ति। सुव्यवस्थिते जयपुरनगरे राजमार्गाणां बृहद्वीथीनां च अत्यन्तमहत्वपूर्णं स्थानं वर्तते। राजमार्गम् अभितः निर्मितविपणिभ्यः बहिः, पदातीनां कृते पदपथः(फुटपाथ) निर्मितः।

पर्वतमालया आच्छादितः चन्द्रप्रासादः नववर्गसिद्धान्ते मध्यवर्गे स्थितो वर्तते। अत्रस्थित चतुष्कालिन्द-उद्यान-जलस्रोतादीनि राजशाहीप्रासादवत् बादलप्रासादं यावत् क्षेत्रस्यास्य अप्रतिमसौन्दर्यं वर्धयन्ति। संगमरमरप्रस्तरनिर्मितं प्रागणं टाइल्सनिर्मितभित्ति-कारणाच्च प्रासादस्यास्य अपरनाम प्रीतमनिवासः वर्तते। पञ्चतलयुक्तस्य प्रासादस्यास्य प्रथमतलः सुखनिवासः, द्वितीयतलः रंगमन्दिरं, तृतीयतलः शोभानिवासः, चतुर्थतलः छविनिवासः, पञ्चमतलः मुकुटनिवास इति नामभिः प्रसिद्धः।

दीवानेखास-दीवानेआम-सिरहड्योढीभवनानि त्रिपोलियाप्रासादे आवागमनाय निर्मितानि। रसोवडा, तातारखाना, तोशाखाना, इत्यादीनि स्वस्वकार्यानुरूपं निर्मितानि। शस्त्रागार-कोषागारादयः महत्वपूर्णविभागाः प्रासादस्य विभागे निर्मापिताः।

शाहीवर्गाकारम् अभितः चौपडद्वयं वर्तते। पूर्वीभागे बृहद्चतुष्पटिका पश्चिमभागे लघुचतुष्पटिका च वर्तते। तयोः दैर्घ्यं विस्तारात् त्रिगुणं वर्तते। द्वयोः चतुष्पट्योः मध्ये अर्धमीलमिता दूरी वर्तते। अनेन प्रकारेण एताः चतुष्पट्यः जनानाम् आमोदप्रमोदाय मिलनस्थलानि वर्तन्ते। नगरस्थवीथीमभितः आपणाः जनेभ्यः लाभदायकाः सन्ति। विस्तृतः पदपथः आपणिक-जनानां च कृते सौविध्यप्रदायकः सिद्धः। पदपथानाम् अधोभागे जलनिकासव्यवस्था प्रकल्पिता येन वृष्टिकालेऽपि जनजीवनं सामान्यं भवेत्। आपणानाम् उपरि रिक्तस्थानात् जनता पर्वकाले तत्र परस्परं सम्मिल्यानन्दोत्सवमाचरन्ति । अनया व्यवस्थया लीकाबूजियर-लुईसकान्हमहोदयौ बहुप्रभावितौ आस्ताम्।

सवाईजयसिंहेन जन्तरमन्तरनामकवेधशाला निर्मापिता। अस्यां वेधशालायां जयप्रकाशयन्त्र-सम्राटयन्त्र-राशिवलयंन्त्र-रामयन्त्राणि खगोलशास्त्राध्ययने अत्यन्त-महत्वपूर्णानि सन्ति। वर्तमानकालेऽपि एतेषां यन्त्राणां प्रासंगिकता वर्तते। अनेन प्रकारेण जयपुरनगरं सवाईजयसिंहस्य काले पं. विद्याधरचक्रवर्तिना सम्यग्रूपेण सुप्रतिष्ठापितमिति।

सवाईजयसिंहः कुशाग्रबुद्धियुक्तः महाराज आसीत्। तस्य मुगलैः साकं मधुरसम्बन्धाः आसन्। येन जयपुरनगरनिर्माणं निर्विघ्नतया सुसम्पन्नमभवत्। जयसिंहः नगरनिर्माणाय नगरनियोजकं विद्याधरभट्टाचार्यं नियुक्तं कृतवान्। अनेन स्वप्रतिभया जयसिंहस्य कल्पनानुगुणं नगरनियोजनस्य प्रारूपं प्रस्तुतम्। नवखण्डेषु विभक्तं नगरमिदं वर्गाकारे वर्तते। नगरस्य वायव्यकोणे नाहरगढ इति नाम्ना पर्वतः वर्तते। नगरनियोजने वायव्यकोणस्थं वर्गमण्डलं एतस्मात् पर्वतात् खण्डितम् अभवत्। अतः तं मण्डलं परिपूर्त्यर्थं आग्नेय-कोणे वर्गमेकं वर्धयित्वा वास्तुशास्त्रसिद्धान्तस्य परिपालनं कृतं वास्तुविदा विद्याधरेण। यतोहि ईशानभागे अपि भौगोलिकदृष्ट्या स्थानम् अनुपलब्धमासीत्। नगरेऽस्मिन् राजमार्ग-निर्माणे वास्तुनियमानां परिपालनं कृतमस्ति। राजप्रासादोऽपि वास्तुशास्त्राधारितो दृश्यते। इत्थं प्रायः समेषां वास्तुनियमानामाधारेण जयसिंहनिर्मापितस्य नगरमिदं न केवलं भारते अपितु समस्तविश्वेऽपि नगरनियोजनसौन्दर्यात् च विशिष्टख्यातिम् अलभत्। यूनेस्को इति संस्थया 2019 तमे ईस्वीयवत्सरे जुलै मासस्य षड् दिनांके यूनेस्कोविश्वधरोहरसूची मध्ये अस्य नाम सम्मिलितं कृतम्। एतत् तु अस्माकं कृते गौरवाय वर्तते।

भारतीयवास्तुशास्त्रे भूमिपरीक्षणसिद्धान्ताः

डॉ. मृत्युञ्जयकुमारतिवारी

स्थापत्यवेद इति नाम्ना सुप्रसिद्धं वास्तुशास्त्रं तावत्प्राचीनं वर्तते यावद्भूम्युपरि मनुजानां सभ्यता विकसिता जाता। वास्तुविद्यायाः निदर्शनं तु वैदिककालादेव दृश्यते परन्तु तस्य सम्पूर्णं स्वरूपं वेदाङ्गेषु, पुराणेषु, आगमेषु च पल्लवितं परिपुष्टञ्च जातम्। वेदाङ्गेषु, ज्योतिषशास्त्रे कल्पशास्त्रे च वास्तुविद्यायाः वर्णनं मुख्यतया दरीदृश्यते। शुल्वसूत्रेषु प्रतिपादितं वेदीनिर्माण-विधिः भारतीयवास्तुविद्याया आधारशिला वर्तते। वास्तुशास्त्रे शास्त्रीयतायाः भौतिकतायाश्च सुविकसितं स्वरूपं प्राप्यते। तद्यथा राष्ट्रकविना लिख्यते यत्-

शैशवदशा मे देश प्रायः जिस समय सब व्याप्त थे।
निःशेष विषयों में तभी हम प्रौढता को प्राप्त थे।।
जब थे दिगम्बर रूप में वे जंङ्गलों में घूमते।
प्रासाद केतन पट हमारे चन्द्र को थे चूमते।।[1]

अस्मिन् संसारे सर्वे जनाः सुखशान्तिमिच्छन्ति। एतदर्थं प्रथमावश्यकता गृहस्य दृश्यते। गृहनिर्माणाय उत्तम स्थानं भवेत्, कारणं यत् गृहं तु अस्माकं समस्तपारिवारिकजनानां, मित्रादीनां, पशवादीनां, कुटुम्बादीनां कृते चाह्लाददायकं भवति -

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्।
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते।
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।[2]

एवमस्माकं समस्तशुभाशुभकर्माणि गृहं विना नैव सिद्ध्यन्ति, यथोक्तम्-

गृहस्थस्य क्रिया सर्वा न सिद्ध्यन्ति गृहं विना।[3]

एतदर्थं निवासार्थमुद्दिष्टस्य भूखण्डस्य गृहनिर्माणात् प्राक् यत्नेन परीक्षणं शास्त्ररीत्या एव करणीयम्। भूमिपरीक्षणे यथा तस्य स्थानस्य उर्वरत्वं, स्वास्थ्यं, प्राकृतिकं सौन्दर्यं, सर्वसौविध्ययुक्तत्वं तथा चानुकूलवातावरणं भवेदिति चिन्तनीयम्। भूमेः

---

1. भारत भारती
2. उद्धृतं बृ. वा. मा. 1.4
3. वास्तुरत्नावली 1.4

परीक्षणविषये वास्तुशास्त्रस्य मानक-ग्रन्थेषु प्राधान्येन समुल्लिखितं दृश्यते। भूपरीक्षणस्य विभागद्वयं वर्तते। तद्यथा-

1. भूस्थलपरीक्षणम्।

2. मृत्तिकापरीक्षणञ्च।

भूपरीक्षणस्य मुख्योद्देश्यन्तु भूमे औचित्यमनौचित्यविचारः। परीक्षणे वर्णः, गन्धः, दिङ्मुखता, ध्वनिः, स्पर्शास्वादनादीनां विस्तृतं ज्ञानं परमावश्यकम्। तद्वदेव स्थलमपि समतलं, शुभादिगभिमुखं, काठिन्यस्वरं, वामतो दक्षिणदिशां प्रति जलस्य प्रवाहयुतं, मृत्तिकायाः प्राचुर्ययुतं च भवेत्। अस्य विपरीतगुणयुता भूमि अधमा त्याज्या चेति विजानीयात्। मानसारानुसारं पूर्वाभिमुखी भूमि एव श्रेष्ठा। एवमेव मयमुनिमते नोर्वराभूमि एकवर्णी च प्रथिता। तद्यथा-

श्वेतासृक्पीतकृष्णा हयगजनिनदा षड्रसा चैकवर्णा।
गोधान्याम्भोजगन्धोपलतुषरहिता प्राक्प्रतीच्युन्नता च॥
पूर्वोदग्वारिसारा वरसुरभिसमा शूलहीनास्थिवर्ज्या।
सा भूमिः सर्वयोग्या कणदरहिता सम्मताद्यैः मुनीन्द्रैः॥[1]

यस्यां भूमौ ग्राम-नगर-पुर-पत्तन-दुर्ग-प्रासाद-भवन-देवालयादीनां निर्माणं करणीयं सा भूमिः प्रथमतया यत्नपूर्वकं परीक्षणीया। समराङ्गणसूत्रे मुख्यतया भूमि-देश-स्थानादिभेदाच्च भूमेः वर्गीकरणं प्रकारत्रयेणोक्तम्। तद्यथा -

1. जाङ्गलभूमिः
2. अनूपभूमिः
3. साधारणभूमिश्चेति।

यस्मिन् स्थाने जलस्याभावः तथा कण्टकादियुताः छायारहितवृक्षाः दृश्यन्ते, रुक्षोष्ण-प्रचण्डवायोः प्रवाहमनुभूयते, भूमिश्च कृष्णमृतिकायुता भवेत्तज्जाङ्गलभूमि इत्यभिधीयते। तथा च यत्र जलाधिक्यं भवेत्, सुरम्यवायुः प्रवहति, दीर्घकायवृक्षाः शोभन्ते, सा सरित्युता भूमि अनूपनाम्ना विज्ञायते। पूर्वोक्तयोरुभयोर्देशयोः सम्मिश्रितप्रकारः नातिशीतोष्णं च प्रदेशो भवेत्तत्तु साधारणमित्यभिधीयते।

समराङ्गणसूत्रादिषु वास्तुशास्त्रीयेषु ग्रन्थेषु आधुनिके युगे प्रचलितानुवंशाङ्गिकनिय-मानाधारीकृत्य भूपरीक्षणस्य पञ्चप्रकाराः उल्लिखिताः सन्ति। यथा-

1. गन्धः
2. वर्णः
3. आस्वादनम्
4. स्पर्शः

---

1. मयमतम् 3.20

5. शब्दः, ध्वनिर्वा।

गन्धः-

घृतगन्धाभूमिः विप्राणां कृते प्रशस्ता, एवमेव क्षत्रियाणां कृते रक्तगन्धा, वैश्याणां तु अन्नगन्धा, शूद्राणां कृते तु मद्यगन्धा निवासाय शुभा मन्यते। यथोक्तम् -

सुगन्धा ब्राह्मणी भूमि रक्तगन्धा तु क्षत्रिया।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका।।[1]

एवमेव कुङ्कुमस्य, अगरोः, कर्पूरस्य, एलस्य तथा चन्दनादीनाञ्च पृथक्पृथक् वा मिश्रितः वा गन्धः प्राप्यते चेदथवा कल्हारस्य, पाटलस्य, कमलपुष्पस्य, मालत्याः, चम्पादि-पुष्पाणां वा गन्धोऽथवा, गोमूत्रस्य, गोमयस्य, दध्नः, दुग्धस्य, मधोः, घृतस्य वा पूर्वोक्तानां चातुर्वर्णानां सदृशः सुगन्धो भवेच्चेत्तेषां फलमपि स्ववर्णसदृशं भविष्यति।

वर्णः -

चत्वारो वर्णाः भूमौ दृश्यते तद्यथा- श्वेतं, रक्तं, पीतं, कृष्णञ्च। चतुर्णां वर्णानां कृते श्वेतादिक्रमेण भूमिः प्रशस्ता ज्ञेया। भूमेः वर्णव्यवस्थायाः मुख्याधारः शुक्लादिवर्ण एव गण्यते। यथोक्तं वसिष्ठमुनिना-

श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीर्भुजाम्।
विशां पीता च शूद्राणां कृष्णान्येषां विमिश्रिता।।[2]

आस्वादनम् -

मधुरा भूमिः सर्वेषां वर्णानां कृते शुभप्रदा मन्यते। परम्परया चतुर्णां वर्णानां कृते रसाधारेणापि भूम्यावण्टनं क्रियते यथा- मधुरा भूमिः ब्राह्मणानां, कषाया च क्षत्रियाणां, अम्ला तु वैश्यानां तथा तिक्ता च शूद्राणाम् कृते शुभङ्करी वर्तते। कल्पद्रुमे यथोक्तम् -

मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता।
अम्ला भूमिर्भवेद्वैश्या तिक्ता शूद्रा प्रकीर्तिता।।[3]

स्पर्शः-

स्पर्शाधारेणापि भूमेः मृतामृतत्वं परीक्ष्यते विद्वद्भिः। यस्यां भूमौ वृक्षाः सम्यक् प्रवर्धन्ते सा जीविता भूमि इति कथ्यते। सा च निवासाय उपयुक्ता भवति एवञ्चास्य विपरीता भूमिः यत्र वृक्षादिकं न प्रवर्धन्ते सा मृता भूमि इति कथ्यते। सा च निवासाय अनुपयुक्ता। तद्यथा-

---

1. विश्वकर्मा प्रकाश 1.25
2. बृहद्वास्तुमाला 1.33
3. विश्वकर्मा प्रकाश 1.26

यत्र वृक्षा प्ररोहन्ति सस्यं हर्षात्प्रवर्द्धते।
सा भूमिर्जीविता वाच्या मृता चातोऽन्यथा भवेत्।।[1]

शब्दः –

वाद्ययन्त्राणां ध्वनिमाधारीकृत्यापि भूपरीक्षणं कुर्याद्यथा मृदङ्गस्य, वेणोः, वल्लक्याः, दुन्दुभेः, भेर्याः, गजस्य, तुरंङ्गस्य ध्वनिः निवासाय प्रशस्ता मन्यन्ते।

प्रकारान्तरेणाऽपि विभिन्नेषु शास्त्रेषु भूपरीक्षणविषये चर्चा वर्तते। तत्र अष्टासु दिक्षु प्लवादीनां विचारः विशेषरूपेण कथ्यते यथा–

श्रियं दाहं तथा मृत्युं धनहानि सुतक्षयम्।
प्रवासं धनलाभं च विद्यालाभं क्रमेण च।।[2]

सामान्यरूपेण पूर्वदिश आरभ्य क्रमेण फलादिकं श्लोकेऽस्मिन् कथितम्। एवमेव सामान्यतया दक्षिणदिशः प्लवमशुभं मन्यते। सर्वैः वास्तुविदैरेकमतेन पूर्व–ईशान–उत्तरदिक्–प्लवाभूमिः प्रशस्ता मन्यते। यथा वाल्मीकिरामायणे प्राप्यते–

प्रागदुक्प्रवणे देशे गुहा साधु भविष्यति।
पश्चाचैवोन्नता सौम्य निवातेयं भविष्यति।।[3]

सुग्रीवस्य राज्याभिषेकानन्तरं भगवता रामेण प्रस्त्रवणगिरिशिखरे स्वनिवासाय तत्र गुहाविषये लक्ष्मणं प्रति भणितम्–ईशानकोणतः निम्नं तथापि नैर्ऋत्यकोणतः उन्नतमस्ति एतदर्थं निवासाय उत्तमं भविष्यति। अस्य वैज्ञानिकं कारणं यदुदयकालीनस्य सूर्यस्य किरणाः प्रातः गृहे एव पतन्ति अनेन गृहे सर्वेषां जनानां नीरोगत्वं सदैव स्थीयते इत्यस्मात् कारणात् गृहे सर्वानन्दत्वं दृश्यते। पश्चिम–दक्षिणदिशोः भूप्लवत्वेऽस्य विपरीतं फलमनुभूयते इति शास्त्रसिद्धम्।

---

1. बृ. वा. मा. 1.101
2. वृहद्वास्तुमाला 1.35
3. वाल्मीकि रामायण, किष्किन्धा कांड 27.12

पुराणेषु वास्तुशास्त्रस्वरूपम्

कन्हैयाकुमारझा (शोधच्छात्रः)

प्रारम्भे तु पुराणन्तु एकमेवासीदिति वर्णनं मत्स्यपुराणे दृश्यते। यथा–

पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम्।।[1]

अपि च अन्यान्यपि मतानि पुराणेषु यत्तानि वेदप्रतिपादकानि सन्ति। यथा– **पुरा नवं भवति पुराणम्।**[2] **जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्।**[3] **सर्ववेदार्थसाराणि पुराणानीति भूपते।**[4] **पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम्। यो न वेद पुराणं हि न स वेदो हि किञ्चन।।**[5] **यस्मात् पुरा हि अनति इदं पुराणम्**[6] **यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः। न चेत्पुराणं संविधान्नैव स स्याद् विचक्षणः।।**[7] **पुरातनस्य कल्पस्य पुराणानि विदुर्बुधा**[8]**।।**

व्याकरणशास्त्रदृष्ट्या पुराणशब्दस्यार्थं पुरार्थात् पुरातनमिति भवति। यास्कस्य निरुक्तानुसारेण पुरा नवं भवति इति पुराणम्। अनेन वायुपुराणानुसारं पुरा अनति अर्थात् प्राचीनकाले यो जीवितमासीदिति। पद्मपुराणानुसारं पुरा परम्परां वष्टि कामयेत् अर्थात् यः परम्परायाः कामना करोतीति, ब्रह्माण्डपुराणानुसारं पुरा एतत् अभूत् अर्थात् प्राचीनकाले एतदभूदिति पुराणम्भवतीति। पणिनीयव्याकरणानुसारं पुराणशब्दः णीञ् प्रापणे धातोः 'ड' प्रत्ययेन 'टि' लोपेन णत्वेन च (पुरा+नी+ड)'पुराण' शब्दः निष्पन्नो भवति। अष्टादशपुराणानि सन्ति। यथा–

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्ट्यम्।
अनाप्लिङ्गकूस्कानि पुराणानि प्रचक्षते।।[9]

---

1. म.पु.अ.53श.–4
2. निरुक्ते 3/1/34)
3. सायण ए.ब्रा. भूमिका
4. ना.पु.1–9–100
5. स्कन्द.पु.बलदेव उपाध्याय इतिहास
6. वायु पु.1/102
7. वायु 1–1–100
8. म.पु.5/3/172
9. देवीभागवतम्–1/3/21

अनेन विवरणेन मत्स्य मार्कण्डेय-भविष्यभागवत-ब्रह्माण्डब्रह्मवैर्वतब्रह्म-वामनवाराहविष्णु-वायुरग्निनारदपद्मलिङ्गगरुडकूर्मस्कन्दपुराणान्येव महापुराणानि सन्ति। पुराणेषु प्रतिपाद्यविषयान् आश्रित्येव पुराणानामाचार्याः पञ्चलक्षणानि निर्दिशन्ति। यथा-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥[1]

1. सर्गः सृष्ट्युत्पत्तिवर्णनम्। 2. प्रतिसर्गः प्रलयस्य सृष्टेश्च पुनरुद्भवः। 3. वंशदेवानामृषीणाञ्च वंशावल्याः वर्णनम्। 4. मन्वन्तराणि प्रत्येकं मनोः कालः तत्कालाधारितानाञ्च वृत्तीनां वर्णनम्। 5.वंशानुचरितम् सूर्यचन्द्रादिवंशजानां नृपाणां वृत्तात्मकं वर्णनम्। एकस्मिन् प्रसङ्गे वर्णनं मिलति यत् पुराणं मानवधर्मः साङ्गवेदः चिकित्सितञ्चेति चत्वारः ईश्वराज्ञया सिद्धाः सन्ति। यथा-

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।
अज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः॥[2]

महाभारते वर्णनं मिलति यत् 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'[3] इति।

पुरा अपि नवं पुराणम् इति रीत्या प्राचीनविहितस्य क्रियाकलापस्य विविधपरिस्थितौ नवप्रयोगवर्णनपरकात् पुराणम् अद्वितीयम् इति निश्चप्रचम्। पुराणप्रवाचकः सूतः स्थापत्यस्य उत्कृष्टतमः विद्वान् आसीत्। अपि च विविधेषु पुराणेषु तत्तद्देवता प्रतिपादकत्वात् तेषां समेषां क्रियाकलापादीनां प्रतिपादनं भविष्यति।

प्रायः समेषु पुराणेषु स्थापत्यकलायाः वर्णनं लभ्यते। तेषु वास्तु-शिल्प-चित्रकलानां बहवः महत्त्वपूर्णबिन्दवः क्वचित् विस्तरात् कुत्रचिच्च सङ्केतमात्रेण गोचरीक्रियन्ते। एतेषु पुराणेषु वास्तुशास्त्रीयदृष्ट्या अत्यधिकं समृद्धं पुराणं मत्स्यपुराणं विद्यते। प्रसंगात् प्रथमं संक्षिप्तेन मत्स्यपुराणानुसारं वास्तुविषयकं विवेचनं करोमि।

मत्स्यपुराणम् -

मत्स्यपुराणे स्थापत्यविद्यायाः अत्यधिकं व्यवस्थितं स्वरूपं प्राप्यते। अत्र प्रायः अष्टादशसु अध्यायेषु वास्तुशास्त्रीयविषया अतिविस्तरेण गदितास्सन्ति। तत्र द्विपञ्चाशदुत्तरद्विशततमेऽध्याये (अध्यायः 252) सप्तत्युत्तराधिकद्विशततमे (270) अध्याये, 254, 255, 257, 258, 259, 270, 273 एवं 292 तमेऽध्याये वास्तुशास्त्रस्य चर्चा विद्यते। 'वास्तुभूतोद्भव'-नामके आदिमे (252 तमे) अध्याये वास्तुपुरुषस्य उत्पत्तिः, भूपरीक्षणम्, एकाशीतिवास्तु-पदविन्यासः इत्यादि विषयाः वर्णितास्सन्ति। 'गृहमाननिर्णय' इत्याख्येऽध्याये सर्वतोभद्र-नन्द्यावर्त-वर्द्धमा

1. शिव.पु. वा.सं. पूर्वभाग दृअ.1/41
2. महाभारत अनुसाशनपर्व।
3. महाभारत आदिपर्व।

नादिभवनानाम् उल्लेखोऽस्ति। 255 तमेऽध्याये रुचक-वज्र-द्विवज्र-प्रलीनक-वृत्तेतिपञ्चानां महास्तम्भानां वर्णनं वर्तते। प्रासादनिर्देशाख्ये मण्डपलक्षणाख्ये च अध्याये मन्दिरस्थापत्यस्य प्रासादस्थापत्यस्य च विस्तृतं वर्णनमस्ति। एतदतिरिच्य प्रतिमालक्षणमपि अतिसूक्ष्मतया विवे. चितमस्ति पुराणेऽस्मिन्।

अग्निपुराणम्

अग्निपुराणे वास्तुशास्त्रसम्बद्धाः बहब अध्यायाः वर्तन्ते। एतेषु नगरवास्तुनः, प्रासा. दवास्तुनः, प्रतिमावास्तुनश्च विशिष्टं वर्णनं प्रत्यक्षीक्रियते। पुराणेऽस्मिन् प्रतिमावास्तुकलाया अतिविशदतया उल्लेखोऽस्ति।

अग्निपुराणे वास्तुविषयाः

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	24	कुण्डनिर्माणस्य वर्णनम्
2	38 तः 46	पर्यंतम् वास्तोः चर्चा
3	49 तः 55	पर्यन्तम् प्रतिमालक्षणवर्णनम्
4	62	देवीप्रतिष्ठाविधिः
5	66	सामान्यदेवप्रतिष्ठावर्णनम्
6	92 तः 106 पर्यन्तम्	देवप्रतिष्ठाविधितः शालाभेदनिरूपणं तावत्
7	122	कालस्य गणना
8	166	कुण्डप्रमाणविधिः
9	247	वास्तुलक्षणादिवर्णनम्
10	327	देवालयस्य माहात्म्यञ्च देवालयादीनां निर्माणस्यावशकता।

गरुडपुराणम्

गरुडपुराणेऽपि वास्तुविद्यासम्बन्धिविषयाणां बहुविस्तरेण विवरणमुपलभ्यते। अत्र त्रिविधानाम् आवासीय-सैन्य-देवालयानां विस्तारपूर्वकं चर्चा विहिताऽस्ति। अत्र पञ्चविधानां प्रासादानां वैराज-पुष्पक-कैलाश-मालिका-त्रिविष्टपानां विवरणञ्च प्राप्यते।

गरुडपुराणे वास्तुविषयाः

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	45	प्रासादमूर्त्तिलक्षणनिरूपणम्।
2	46	प्रासाददुर्गदेवालयादीनां वास्तुमानानुसारेण लक्षणं निरूपणञ्च
3	47	प्रासादलिङ्गमण्डपादिशुभाशुभवर्णनम्
4	48	संक्षिप्तदेवप्रतिष्ठाविधिनिरुपणञ्च
5	9	यममन्दिरप्रवेशवर्णनम्

6	11	ऊर्ध्वाधोगतिज्ञापकोत्क्रमणद्वारनिरूपणम्
7	20	प्रेतानां स्वगृहमित्रगृहादिषु पीडोत्पादनम्

स्कन्दपुराणम् -

स्कन्दपुराणस्य विभिन्नेषु अध्यायेषु वास्तुशास्त्रीयाः विषयाः वर्णिताः सन्ति। तत्र वैष्णव-महेश्वरखण्डयोः कक्ष-मण्डपस्थानां निर्माणसम्बन्धिश्लोकाः वर्तन्ते।

स्कन्दपुराणान्तर्गत माहेश्वरखण्डान्तर्गतकौमारिकखण्डः

क्रमाङ्कः	अध्यायः	वास्तुविषयाः
1	6	विश्वकर्माद्वारा निर्मापिते महीनगरे स्थापनावर्णनम्
2	35	अथ महीसागरसंग्रामे देवानां प्रार्थनया जयस्तम्भं संस्थाप्य तदुपरि विश्वकर्मणा निर्मितस्य तृतीयस्य लिङ्गस्य स्तम्भेश्वरनाम्ना संस्थ. ापनं, कूपतीर्थनिर्माणं च।
3 माहेश्वरखण्डे तृतीये उत्तरार्द्धे	16	सरः खननपूर्वकं पुरनिर्माणपुर:सरारुणाचलेश्वरमन्दिरनिर्माणम्
4 वैष्णवखण्डः	7	विश्वकर्मकृतपुरालंकारादिक्रमः जगन्नाथक्षेत्रमाहात्म्यम्
5	16	इन्द्राद्युम्नाज्ञया देवशिल्पिनां देवालयनिर्माणम्। ततो नारदहस्तेन नरसिंहमूर्त्तिस्थापनम्
6	23	सतीन्द्रद्युम्नेन मयेन निर्मिते प्रासादे देवस्थापनम्
7	25	श्रुत्वेन द्युम्नन्नाज्ञया पद्मनिधिना स्वर्णशालानिर्माणम् नारदाज्ञया विश्वकर्मणा स्यन्दनत्रयनिर्माणम् तस्य रथस्य नारदेन स्थापनम्। तत्प्रसंगेन रथस्थापनविधिप्रकारवर्णनम्, रथध्वजे नृसिंहमूर्त्ति विधाय समन्त्रकां गरुडप्रार्थनां कृत्वा रथे भगवन्मूर्त्तिप्रतिष्ठापनवण र्णनम्।
8	28	देवताप्रतिष्ठासमयोच्चारितमंत्रस्तद्देवानां प्रत्यक्षदर्शनं स्वस्थान. ावस्थानं च वेदादीनामपि प्रत्यक्षमूर्त्तिभिरागमनम्
9 स्कन्दपुराणे तृतीये ब्रह्मखण्डे	37	फुलग्रामस्य क्षीरकुण्डमाहात्म्यवर्णनम् विश्वकर्मद्वारा मुद्गलाश्रमे विस्तीर्णकुण्डखननम्।
10 धर्मारण्यखण्डम्	32	धर्मारण्यस्य पुनः पूर्ववत्सत्यमंदिरनगरं स्थितिस्थापनम्
11	33	जीर्णोद्धारकार्यारम्भं विधाय विविधवहिशाला, गृहशाला, बह्मशालानां निर्मापनम्, दुर्गकुण्डप्रतोली धर्मवापीकूपप्रभृतिनगरो पयोगिव्यवस्था
12 काशीखण्डे	1	कुण्डमाहात्म्यसहितसांवदित्यमाहात्म्यकथनम्
13 षष्ठे नगरखण्डे	40	ब्रह्मणा पृथिव्यां शिलास्थापनम्
14	73	धृतराष्ट्रकृतप्रासादस्थापनादिवृतान्तवर्णनम्।
15	75	यज्ञभूमिमाहात्म्यवर्णनम्

16	105	प्रासादनिर्माणे राज्ञा प्रत्यनकरणम्। ततो भूमिखननसमये चतुर्वक्त्रलिङ्गदर्शनम्।
17	107	लिङ्गानां नवप्रासादं रचयित्वा स्थापनाकरणम्
18	160	पुष्पादित्यस्य मंदिरनिर्माणकरणम्
19	161	दुर्गोत्पत्तिवर्णनम्
20 प्रभासखण्डे	23	चन्द्रेण शिवदत्तं लिङ्गं गृहीत्वा विश्वकर्मणा लिङ्गस्थापनायज्ञकरणम् ततः स्वर्गलोकं गत्वा प्रभासं यज्ञकर्तुं। विश्वकर्मणा यज्ञशाला, पत्नीशालादिनिर्माणम् ततश्चन्द्रेण ब्रह्मादिभिः सह यज्ञकुण्ड-निर्माणम्

विष्णुधर्मोत्तरपुराणम् -

वास्तुशास्त्रस्य विशदं वर्णनं विष्णुधर्मोत्तरपुराणेऽस्ति। तत्र प्रायः चत्वारिंशत्सु अध्यायेषु वास्तु-प्रतिमा-चित्रकलानां विषया वर्णिताः दृश्यन्ते। पुराणेऽस्मिन् भूचयनस्य, भूपरीक्षणस्य, वास्तुपुरुषस्य च लक्षणं द्वितीये खण्डे एकोनविंशेऽध्याये तथा तृतीये खण्डे त्रिनवतितमेऽध्याये विद्यते। तद्यथा-

गर्भे च कुसुमं यस्यां न म्लानम् उपगच्छति।
उदकं च तया यस्यां शीघ्रं राम न जीर्यते॥
न निर्वाणमाप्नोति यस्यां दीपश्च भार्गव।
सा प्रशस्ता क्षितिस्तस्यां निवेशं कारयेद् बुधः॥[1]

चतुःषष्टि-वास्तु-पदविन्यासः, भवनानां विभागादयः अध्यायेऽस्मिन्नेव वर्णिताः सन्ति। वृक्ष- उद्यानसम्बन्धिविषयाः पुराणेऽस्मिन् त्रिंशेऽध्याये विस्तरेण प्रतिपादिताः सन्ति। तृतीये खण्डे नवसु अध्यायेषु चित्रकलायाः अतिविशदतया वर्णनमस्ति। भित्तिचित्रनिर्माणविधयः प्रलेप-रचनाप्रभृत्युपायैः तेषां कलानां संरक्षणं चित्राणां सत्य-वैणिक-नगर-मिश्रेतिप्रकारचतुष्टयम्, चित्रालेखनस्य विविधपद्धतय इत्यादि नैके विषया अत्र समाहिताः सन्ति। तृतीये खण्ड एव प्रायः एकादशसु अध्यायेषु मन्दिरवास्तुनः प्रासादवास्तुनश्च अतिरम्यं चित्रणं वर्तते। शतविधानां देवप्रासादानां लक्षणादयः तेषां रचनाविधिः तदर्थं शिलाचयनविधिः वज्रचूर्ण-अवलेहनिर्माण विधिश्चेत्यादयो विषया वर्णितास्सन्ति।

विष्णुधर्मोत्तरपुराणस्य तृतीयः खण्डः

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	2	प्रतिमास्वरूपस्य वर्णनम्
2	47	विष्णुप्रतिमानिर्माणस्य वर्णनम्
3	74	लिङ्गस्वरूपस्य वर्णनम्
4	87	चतुष्षष्टिदेवतायाः सामान्यप्रासादस्य लक्षणम्।

1. विष्णुधर्मोत्तरपु. खण्ड-2, अध्यायः 29/6-7

5	91	वर्णभेदानुसारेण प्रासादस्य इष्टिकायाः वर्णनम्।
6	93	नगरेषु प्रतिमायाः देवतायननिर्माणस्य भूमिचयनम्
7	95	वास्तुपुरुषस्य शल्याशल्यविचारः
8	97	प्रतिष्ठाविधिः
9	341	देवप्रासादस्य संस्कारः

ब्रह्मवैर्वतपुराणे वास्तोः वर्णनम्

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	2	रत्नमण्डपम्।
2	3	कोपमन्दिरद्वारम्।
3	5	राधामन्दिरषोडशद्वाराणां वर्णनम्।
4	13	नन्दगृहगमनगर्गगृहगमनञ्च।
5	40	हिमाचलगृहमानम्
6	57	पददेवताजयदौवारिक-अभयदानवर्णनम्
7	70	कृष्णमूर्त्तिवर्णनम्
8	102	सान्दीपनिगृहगमनम्।
9	103	द्वारकानगराऽर्थं स्थलयाचनद्वारकानिर्मातुं विश्वकर्माणं प्रत्याज्ञा द्वारकापुरं किदृग्गुणविशिष्टं भवेदिति वर्णनम्, पुर प्रवेशस्य वर्णनम्
ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे	10	शिल्पकारोत्पत्तिर्भूलोके विश्वकर्मणादिवर्णनम्

विष्णुपुराणम्

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	6	दुर्गपुरखर्वटग्रामादिपृथिवीविभागकाराणम्
2	22	विश्वकर्मणा समुद्रे द्वारकानिर्माणम्

वाराहपुराणम्

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	92	पुरनिर्माणम्
2	186	रौप्यप्रतिमास्थापनम्
3	196	धर्मराजपुरवर्णनम्, यमपुरप्रमाणे नानाविधसमृद्धिवर्णनम्

भविष्यपुराणम्

क्रमाङ्कः	**अध्यायः**	**वास्तुविषयाः**
1	131	सूर्यप्रतिमायाः निर्माणम् एवञ्च दारुपरीक्षणम्
2	132	सर्वदेवप्रतिमालक्षणवर्णनम्
3	133	प्रतिमाप्रतिष्ठाविधिवर्णनम्
4	134	प्रतिष्ठाकामोपयुक्तकालादिवर्णनम्
5	135	सर्वदेवप्रतिष्ठावर्णनम्
6 मध्यमपर्वे	12	प्रतिदेवताप्रतिमालक्षणम्
9	13	विविधकुण्डनिर्णयवर्णनम्
10	19	प्रतिष्ठाविधिवर्णनम्
11	20	गृहवास्तुदेवप्रतिष्ठार्चनवर्णनम्

अनेन प्रकारेण विविधपुराणेषु बहुधा वास्तुघटकविषयाः वर्णिताः सन्ति। सर्वेषां विषयाणां विवेचमत्र निबन्धे असम्भवम्। अत एव संक्षिप्तेन वास्तुविषयाः विवेचिताः।

वास्तुशास्त्रे द्वारविधानम्

मधुसूदन शर्मा

नमस्ते वास्तुपुरुष भूशय्याभिरतप्रभो।
मद्गृहे धनधान्यादि समृद्धिङ्कुरु सर्वदा।।

निवासार्थकाद् वस् इत्यस्माद्धातोः तुण् प्रत्यये कृते सति निष्पन्नोऽयं वास्तुशब्दः। यत्र मनुष्याः निवसन्ति च तस्य संज्ञा वास्तु इति। अस्य बहवो भेदास्सन्ति यथा-गृहं, देवालयः, ग्रामः, नगरम्, पुरम् इत्यादयः। अथवा वसन्ति प्राणिनो यत्र अनया व्युत्पत्या वास्तुशब्दस्य अर्थो भवति गृहम् अथवा गृहकरणयोग्य भूमिः। निरुक्तकारेण निरुक्तेखपि **वास्तुर्वसतेर्निवासकर्मणः गृहकरणयोग्यभूमिः**[1] निर्वचनमिदं कृतम्।

शतपथश्रुतौ दर्शपूर्णमासेष्टौ स्विष्टकृद्यागप्रसङ्गेऽपि वास्तुशब्दस्य अर्थो भवति यज्ञशालाऽथवा भूमिः। तद्यथा - **यज्ञेन वै देवाः दिवमुपोदक्रामन्नथ योऽयं देवः पशूनामीष्टे स इहाहीयत तस्माद्वास्तव्य वास्तौ हि तदहीयत।**[2] मानवाय निवासाय च गृहनिर्माणमावश्यकं वर्तते यतोहि गृहा वै प्रतिष्ठा अनया श्रुत्या मानवीय प्रतिष्ठायाऽधारं गृहमेवोक्तम्। अतः प्रत्येकं मानवस्य स्वगृहं भवितव्यम्, यतोहि गृहं बिना न लभ्यते श्रौत. स्मार्तफलम् तदुक्तं बृहद्वास्तुमालायाम्-

गृहस्थस्य क्रियाः सर्वाः न सिद्धयन्ति गृहं बिना।
यतस्तस्माद् गृहारम्भ-प्रवेश समयौ ब्रुबे।।
परगेहे कृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः।
न सिद्धयन्ति यतस्तस्माद् भूमीशः फलमश्नुते।।[3]

गृहादिनिर्माणकार्येषु वास्तुशास्त्रीयदृष्टिकोणमावश्यकम् वर्तते यतोहि एतस्मात् सर्वदोषाणां निराकरणं भूत्वा शुभप्रवृत्तीनामागमनं वर्धानञ्च भवति। तदुक्तं वास्तुकल्पलतायाम्- **''प्रसादभवनोद्यानप्रारम्भे परिवर्तने। पुरवेश्मप्रवेशेषु सर्वदोषापनुत्तये।।''**[4]

अतः वास्तुशास्त्रानुसारेण भवननिर्माणार्थम् एतादृश्याः भूमेः चयनं करणीयं, या समदृढोच्चा च भवेत्, तत्र वृष्टिजलम् एकत्रितं न भवेत्, एतस्मिन् सन्दर्भे भूमौ पिपीलिका -

---

1. निरुक्ते - 10/2/9
2. शतपथश्रुतौ- 1/6/7/1
3. बृहद्वास्तुमालायाम्- 2/7
4. वास्तुकल्पलतायाम्- 6

सर्पाऽस्थिभस्मखर्परलोहादयः यदि प्राप्यन्ते तर्हि तत्र भवननिर्माणं नैव करणीयं, यतोहि एतानि वस्तूनि सङ्केतयन्ति यत् भूमिर्दृढा नास्ति। यत्र भूमिः दृढा भवति तत्र गुरुत्वाकर्षणशक्तेः प्रभावात् निर्मितं भवनमपि सुदृढं चिरञ्च भवति।

कात्यायनश्रौतसूत्रे यज्ञवेदिनिर्माणप्रसङ्गे स्पष्टनिर्देशोऽयं यत् यागशालामण्डपवेदि. निर्माणाय भूमिः दृढोच्चसमा भवेदिति। **''उच्चतमं समविभ्रंशि''**[1] एवमेव वेदाङ्गनिर्देशं वास्तुविद्यायां यथावत् गृह्यते। तदुक्तं बृहद्वास्तुमालायाम्–

पूर्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः।
दक्षिण्यो मृत्युदो वास्तुर्द्धनहा पश्चिमप्लवः।।[2]

ततः परं जिज्ञासा जायते यत् भवने द्वारनिमाणं कुत्र, कदा, कति वा करणीयम्? अतः वास्तुशास्त्रानुसारेण मया द्वारनिर्माणविधानं क्रियते।

मुख्यद्वारस्थापनं भवनस्य कस्यां दिशि भवितव्यम् इति जिज्ञासायां वास्तुशास्त्रचार्याणां भिन्नं-भिन्नं मतमुपलभ्यते। तेषां मतानां वर्णनं मयाऽत्र क्रियते।

1. गृहेशराश्यनुसारेण द्वारदिग्विभागः–

कर्कवृश्चिकमीनराशीनाङ्कृते प्राच्यांदिशि, कन्यामकरमिथुनराशीनाङ्कृते दक्षिणस्यां दिशि, तुलाकुम्भवृषराशीनाङ्कृते प्राच्यां दिशि, मेषसिंहधनुषराशीनाङ्कृते उत्तरस्यां दिशि द्वारनिर्माणमुत्तमफलदायकं भवति। बृहद्दैवज्ञे तदुक्तम्–

पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम्।
शूद्राणां पश्चिमे द्वारं नृपाणामुत्तरे स्मृतम्।।[3]

गृहारम्भमासाधारेणद्वारम्–

कर्क (श्रावण), नक्र (मकर-माघ), सिंहकुम्भराशिस्थ सूर्ये यदि गृहारम्भो भवति चेत् पूर्वपश्चिमयोः मुखयोः द्वारयोः भवनं भवितव्यम्। तुलामेषवृषवृश्चिकराशिस्थ सूर्ये यदि गृहारम्भो भवेत् चेत् दक्षिणोत्तरयोः मुखं भवितव्यम्। अस्यापरविधिना कश्चन भवनद्वाररस्य निर्माणं कारयति चेत् महान् कष्टो भवति अर्थात् शारीरिकरोगशोकं धनादिनाशश्च भवति। तथा च मीनधनुमिथुनकन्याराशिस्थसूर्ये भवनद्वारनिर्माणं न भवति शुभम्।

फाल्गुनमासे कुम्भराशिस्थसूर्ये, श्रावणमासे कर्के सिंहराशिस्थसूर्ये, पौषमासे मकरराशिस्थसूर्ये गृहारम्भो भवति चेत् पूर्वाभिमुखं पश्चिमाभिमुखञ्च भवनस्य निर्माणमुत्तमम्, मार्गशीर्षे तुलावृश्चिकराशिस्थसूर्ये, वैशाखमासे वृषमेषराशिस्थसूर्ये दक्षिणाभिमुखं गृहं शुभदमिति। तदुक्तं रत्नमालायाम्–

---

1. का.श्रौ.सू. 7/1
2. बृहद्वास्तुमालायाम् 10/41
3. बृहद्दैवज्ञे - 86/354

कुम्भेऽर्के फाल्गुने मासि श्रावणे सिंह कर्कयोः।
पौषनक्रे गृहं कुर्यात् पूर्वपश्चिमदिङ्मुखम्॥
मार्गे तुलाऽलिगे भानौ वैशाखे वृषभाजयोः।
दक्षिणेदिङ्मुखं श्रेष्ठं मन्दिरं नेष्टमन्यथा॥[1]

गृहारम्भतिथ्याधारेण द्वारनिर्माणम्-

गृहारम्भस्य मुहूर्त्तः यदि पूर्णिमातिथित आरभ्य अष्टमीपर्यन्तं भवेत् चेत् भवनस्य मुख्यद्वारं प्राच्यां न निर्मातव्यम्। यदि कृष्णपक्षस्य नवमीतिथितः चतुर्दशीतिथिपर्यन्तं गृहारम्भो भवेत् चेत् उत्तरस्यां दिशि द्वारं न भवति शुभम्। अमावस्यातः शुक्लपक्षस्य अष्टमीपर्यन्तं गृहारम्भो भवति चेत् पश्चिमायां दिशि द्वार निर्माणं शुभं न भवति। पुनः शुक्लपक्षस्य नवमीतिथितः चतुर्दशी पर्यन्तं गृहारम्भो भवति चेत् दक्षिणस्यां दिशि द्वारो न भवति शुभम्। तदुक्तं वास्तुरत्नाकरे-

पूर्णिमातोऽष्टमीं यावत्पूर्वस्यां वर्जयेद्गृहम्।
उत्तरस्यां न कुर्वीत नवम्यादि चतुर्दशीम्॥
अमातश्चाष्टमीं यावत्पश्चिमास्यं विवर्जयेत्।
नवम्यादौ दक्षिणास्यं यावच्छुक्लचतुर्दशीम्॥[2]

द्वारस्थापने शुभनक्षत्रणि-

अश्विनी त्रिषूत्तरादिषु, स्वाती, रोहिणी एतानि नक्षत्राणि द्वारस्थापनाय शुभकारकाणि भवन्ति। तदुक्तं बृहद्वास्तुमालायाम्-

द्वारस्थापननक्षत्राण्युच्यन्तेऽश्विनि चोत्तराः।
स्वातौ पूष्णि च रोहिण्यां द्वारशाखावरोपणम्॥[3]

द्वारस्थापने वारविचारः-

गुरुमतानुसारेण ध्रुवनक्षत्रे शुभवारे स्थिरलग्ने शुभतिथौ च द्वारस्थापनं शुभं भवति। तेष्वपि मृगशिरा चित्र च कुलसम्पत्तिं वर्द्धयति, अपि चरे स्थिरे च नक्षत्रे बुधश्शुक्रवासरेश्च शुभतिथौ द्विस्वभावलग्ने द्वारं शुभं भवति। तदुक्तं बृहद्वास्तुमालायाम्-

ध्रुवभे शुभवारे च स्थिरे लग्ने शुभे दिने।
द्वारं स्थाप्यं मृगचित्रवर्गसम्पद्विवर्द्धनम्॥
चरे स्थिरे च नक्षत्रे बुधशुक्रदिने तिथौ।
शुभकपाटयोगः स्याद् द्विस्वभावोदये गृहे॥[4]

---

1. रत्नमालायाम् - 17/14-15
2. वास्तुरत्नाकरे 81/12/13
3. बृहद्वास्तुमालायां द्वारस्थापन विचारे-168
4. बृहद्वास्तुमालायाम् 173/174 पृ. 93

यदि एकद्वारस्योपरि द्वितीयं द्वारनिर्माणकर्तुमिच्छेत् चेत्तदा अधोद्वारस्यापेक्षया लघ्वाकारो निर्मातव्यः बृहदाकारो न। लघुबृहदाकाराणि यानि द्वाराणि भवन्ति तेषां शीर्षाणि एकसूत्रे उत्तमानि। द्वारमानं यदि प्रमाणापेक्षया अधिकं भवति तदा रोगं प्रददाति तथा च न्यूने सति धननाशो भवति। वास्तुमुखं गृहद्वारात्मकं तस्याङ्गभङ्गो यदि भवति चेत् तस्मिन् निवासकर्ता कदापि सुखं न प्राप्नोति।

निर्माणदृष्ट्या सौन्दर्यदृष्ट्या च प्रधानद्वारम् अन्यद्वारापेक्षया बृहद्-घट-पत्रं फलमित्यादि-माङ्गलिकैः चिन्हैः सज्जितं कार्यम्। शेषद्वाराणि सामान्यरूपेणैव भवितव्यानि। तदुक्तं बृहद्वास्तुमालायाम्-

मूलद्वारं नान्यैरभिसन्धीत रूपद्धर्या।
घटफलपत्रप्रमथादिभिश्च तन्मङ्गक्लैश्चिनुयात्॥[1]

द्वारप्रमाणम् -

भवनस्य हस्तात्मकं व्यासतुल्याङ्गुलीषु 50 अङ्गुलीनां योगकृते सति कनिष्ठद्वारस्य उच्चता, 50 अङ्गुलं संयोज्य मध्यमद्वारस्य उच्चता, तथा च 70 अङ्गुलं योजयित्वा उत्तमद्वारस्य उच्चता भवति। भवनदैर्घ्यस्य (13) त्रयोदशभागयुक्तदैर्घ्यार्धसमानोत्तमदीर्घता, दैर्घ्यस्य तृतीयांशन्यूनसमा मध्यमद्वारस्य दीर्घता, तथा च दैर्घ्यार्धतुल्यं निकृष्टद्वारस्य दीर्घमानं भवति। तदुक्तं वास्तुराजबल्लभे-

षष्ट्या वाऽथ शतार्धसप्तति युतैर्व्यासस्य हस्ताङ्गुलै-
र्द्वारस्योदयको भवेच्च भवने मध्यं कनिष्ठोत्तमौ।
दैर्घ्यार्धोन च विस्तरः शशिकलाभागोधिकः शस्यते
दैर्घ्यात्त्रयंशविहीनमर्धरहितं मध्यं कनिष्ठं क्रमात्॥[2]

तावदङ्गुल्यद्वारस्य दीर्घता अपि च द्वारस्य दीर्घतां द्विगुणी कृत्य द्वारस्योच्चता करणीया। यदि भवने एकमेव द्वारं भवेत् तर्हि पूर्वदिशि निर्माणमुत्तमं भवति। ब्रह्मा-भूतेन-जैनानां मन्दिरेषु चतुर्षु दिक्षु द्वारनिर्माणं श्रेष्ठं भवति। यदि भवने द्वारद्वयं निर्माणं कर्तुमिच्छति चेत्तर्हि पूर्वपश्चिमाभ्यां सहैव द्वार निर्माणं यदि द्वारत्रयमिच्छेत्तदा दक्षिणे द्वारं न करणीयम्। तदुक्तं वास्तुरत्नाकरे -

एकं द्वारं प्राङ्मुखं शोभनं स्याच्चातुर्वक्त्रं धातृभूतेषजैने।
युग्मं प्राच्यां पश्चिमेऽथ त्रिकेषु मूलद्वारं दक्षिणे वर्जनीयम्॥[3]

यस्मिन् भवने बहूनि द्वाराणि भवन्ति तस्मिन् भवने द्वारप्रमाणं नावश्यकम्। मुख्यगृहं विहाय अन्येषु गृहेष्वपि द्वारप्रमाणं नावश्यकम्।

---

1. बृहद्वास्तुमालायाम् 94/159
2. वास्तुराजवल्लभे 5/13
3. वास्तुरत्नाकरे 91/49

बहुद्वारेष्वलिन्देषु न द्वारनियमः स्मृतः।
तथोपसदने जीर्णे द्वारे सन्धारणेखपि च।।[1]

द्वारदोषः-

वास्तुशास्त्रे द्वारसम्बन्धीनां प्रमुखदोषानामुल्लेखो प्राप्यते। यथा-

1. गृहस्वामिनः राशिः, वर्णोऽथवा ध्वजाद्याधारेण निर्धारितेषु दिक्षु न द्वारस्थापना।
2. निर्धारितगृहपार्श्वेष्वपि तस्य पार्श्वस्य निर्दिष्टभागे द्वारस्थापना न भवेत्।
3. द्वारस्य दीर्घोच्चता वास्तुशास्त्रसम्मता न भवेत्।
4. द्वारस्योपरि अथवा पार्श्ववर्ती भागे वक्रतादि भवेत्।
5. द्वारस्य स्वयमेव उद्घाटनं पिधानं वा भवेत्।
6. द्वारस्योद्घाटनसमये पिधानसमये वा शब्दो यदि भवेत्।
7. द्वारस्योपरि द्वारं तथा च द्वारस्यपुरतः द्वारं भवेत्।
8. भवनस्य द्वयोः पार्श्वयोः सन्धिस्थाने द्वारं भवेत्।
9. भित्तेः मध्यभागे द्वारं भवेत्।
10. भवनस्य शिरा मर्मस्थाने वा द्वारं भवेत्।
11. द्वारस्याग्रे वेधकारकः पदार्थो यदि भवेत्।

विविधद्वारदोषाणां विशेषफलम् -

द्वारस्योद्घाटनं यदि स्वयमेव भवति तदा स्वामी उन्मादरोगेन पीड़ितो भवति। स्वयमेव पिधानं भवति चेत् गृहस्वामिनः कुलनाशो भवति, शास्त्रोक्तप्रमाणेन यदि दीर्घाकारो भवति तस्मात् राजभयम्, तथा च न्यूने सति चोरभयं शारीरिककष्टमपि भवति। प्रमाणेन स्थूलाधिक्ये सति बुभुक्षा भयकारकश्च भवति। द्वारशाखायां वक्रतादोषश्चेत् कुलनाशो भवति। तथा च गूलरकाष्ठेन निर्मितं द्वारं गृहस्वामिनः कृते कष्टदातृ भवति। गृहमन्ते द्वारे प्रवृत्तिः यदा भवति तदा गृहस्वामी मृत्युतुल्यकष्टं प्राप्नोति। गृहात् बहिः प्रवृत्तिश्चेत् गृहपतये प्रवासाधिक्यो भवति। यथोक्तम् -

स्वयमपि च कपाटोद्घाटनं वा पिधानं भयदमधिकहीनं शाखयोर्वा विचाले।
पुरुषयुवतिनाशं स्तम्भशाखाविहीनं भयदमखिलकाष्ठाग्रं यदाधाः स्थितं स्यात्।।[2]

उपर्युक्तेन शास्त्रोक्तप्रकारेण यदि भवने द्वारनिर्माणं क्रियते तर्हि भवनवासिनः नीरोगतां, निर्भयतां, निरापदां, सुरक्षां, सन्तुष्टिं, समृद्धिं, सबलतां, सर्वविधसफलताञ्च प्राप्नुवन्तीति।

---

1. वास्तुरत्नाकरे 91/50
2. वास्तुराजवल्लभे 5/29

वास्तुशास्त्रदृष्ट्या द्वारस्थापनविचारः

विजयप्रसादरतूड़ी

अस्मिन् संसारे सर्वे प्राणिनः सुखस्य कृते तत्पराः सन्ति परन्तु सुखस्य प्राप्तिः कथं भवेदित्यर्थं प्राचीनकालादेव महर्षयो मनीषिणश्च नैकानां मार्गाणां दिग्दर्शनं कृतवन्तः। अत एव गृहादिनिर्माणे यो विधिः वास्तुशास्त्रे अस्ति तमनुसृत्य एव गृहनिर्माणे गृहद्वारस्य ज्ञानम् करणीयम्। यस्मिन् स्थाने देवाः मानवाश्च निवासं कुर्वन्ति सः वास्तु इति नाम्नः ज्ञेयम्। वास्तुशास्त्रस्य चत्वारो भेदाः सन्ति प्रथमं भूमिः द्वितीयं प्रासादः, तृतीयं यानं तथा चतुर्थं शयनञ्च।

भूमि प्रासादयानानि शयनं च चतुर्विधम्।
भूरेव मुख्यवस्तु स्यात्तत्र जातानि यानि हि॥
प्रासादादीनि वास्तूनि वस्तुत्वाद् वस्तुसंश्रयात्।
वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन् पुरातनैः॥[1]

एषु च प्रधानवस्तु भूमिः वर्तते। सम्पूर्ण संसारे सर्वे पदार्थाः अस्याः एव उत्पन्नाः जाताः। प्रासादादयः प्रधानवास्तु भवति। अत एव सर्वेषां पदार्थानाम् उत्पत्तिः स्थानं रत्नगर्भा भूमिरस्ति। एवं च आश्रिताः अपि भवन्ति। अतः ते सर्वे वास्तुरूपेण परिलक्षितं भवति। वास्तुशास्त्रस्याभिप्रायः निवासोपयुक्तं स्थानं भवति। वैदिकवाङ्मये वास्तुशब्दस्याऽर्थः गृहं, भवनं इति नाम्नः ज्ञायते। अयं शब्दः ''वस्'' निवासे धातुना सह 'तुण्' प्रत्ययेन निष्पन्नो भवति यत्र निवासो भवति तदेव वास्तुः 'वसन्ति प्राणिनो यत्र'। वस्तुतः ''वास्तुर्वसतेर्निवासकर्मणः'' सः वास्तु 'वस्' धातौ 'वसेस्तुन वसेर्णिच्च' इत्यनयोः सूत्रयोः निष्पद्यते। अस्या अनेकभेदाः सन्ति। यथा गृहम्, ग्रामः, देवालयः पुरादयश्च। ऋग्वेदे एकस्मिन् मन्त्रे वास्तुदेवतां 'वास्तोष्पतिं' प्रार्थयन् ऋषिः निगदति यत् हे वास्तोष्पते। अस्मान् प्रति जानीहि वयं सर्वे जनाः नीरोगिणः भवन्तु। यद् धनं वयं याचामहे तद् अस्मभ्यं ददातु द्विपदे चतुष्पदे च कल्याणकारी भव –

वास्तोष्पते प्रति जानीह्यस्मान्त्वावेशो अनमीवोभवा नः।
यत् त्वेमहे प्रतितन्नो जुषस्व शं नो भवद्विपदे शं चतुष्पदे॥[2]
अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः॥[3]

---

1. मयमतम् अ.2 श्लो. 2–3
2. ऋग्वेदसंहिता– (7/54/1)
3. ऋग्वेदसंहिता– (7/55/1)

वास्तुशास्त्रे गृहद्वारमेव गृहस्यप्रमुखमङ्गमस्ति। मानवदेहे यथा नासिकामुखयोः स्थानं भवति तथैव गृहे द्वारस्य स्थानं भवति। गृहे यदि कश्चिद्दोषः भवति तदा तस्य दोषस्य प्रभावः सन्तत्युपरि पतति। अत एव वास्तुशास्त्रस्य विविधग्रन्थेषु गृहद्वारस्य एकं निश्चितं मानं भवति। गृहनिर्माणे बहूनां विषयाणां विचारः क्रियते। वास्तुशास्त्रानुसारेण गृहनिर्माणात् पूर्वं भूखण्डस्य परीक्षणं, भूखण्डोपरि दिक्शोधनस्य ज्ञानञ्च करणीयम्। तत्पश्चात् स्वेच्छानुसारेण वास्तुशास्त्रमाध्यमेन च भवनानां निर्माणं तथा गृहे द्वारस्य विचारः कर्तव्यः। गृहनिर्माणकाले दिग्ज्ञानमावश्यकमस्ति। दिग्ज्ञानं विना भूखण्डस्य तथा गृहद्वारस्य सम्यक् स्थितिः ज्ञातुं न शक्यते। वास्तुशास्त्रमाध्यमेन गृहद्वारं निवासकर्तृणाम् उन्नतेः द्वारमपि भवति। अत एव द्वारस्थापने वास्तुशास्त्रस्य विधिः प्रयुक्तः करणीयः। द्वारस्यायामो विस्तारश्च कीदृशः स्यात्? कस्यां दिशि गृहद्वारं शुभदं भवतीत्यपि विचारणीयम्। भवनस्य यस्यां दिशि द्वारनिर्माणं क्रियते तदा तस्यां दिशि भवनस्य यद् दैर्घ्यमानं भवति, तं नवधा विभज्य पञ्चभागं दक्षिणे भागे तत्पश्चात् भागत्रयं वामभागे विहाय शेषभागे द्वारनिर्माणं करणीयम्। भाद्रपदमासात् त्रयस्त्रयो मासाः पूर्वादिक्रमेण यस्यां दिशि वास्तुपुरुषस्य मुखं भवेत्, तस्याम् एव दिशि गृहद्वारं शुभं भवति।

त्रिषु-त्रिषु च मासेषु नभस्यादिषु वै क्रमात्।
यद् दिङ्मुखो वास्तुनरः तन्मुखं सदनं शुभम्।।[1]

वास्तुशास्त्रीयग्रन्थेषु गृहस्य मुख्यद्वारस्थापने राशिविचारः क्रियते। गृहपतेः राश्यनुसारेण द्वारस्य निर्धारणं करणीयम्। ब्राह्मणवर्णराशीनां कृते पूर्वद्वारं शुभं भवति। क्षत्रियवर्णराशीनां कृते उत्तरदिशि द्वारं शुभकारकं भवति। वैश्यानां कृते दक्षिणाभिमुखं, शूद्राणां च कृते पश्चिमद्वारं शुभफलदायकं भवति।

पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणं शुभम्।
शूद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम्।।[2]

कन्याराशितः त्रिषु त्रिषु राशिषु सूर्ये पूर्वादिदिक्षु द्वारनिर्माणं न करणीयम्-

राशयः	**अशुभद्वारदिशा**
कन्या-तुला-वृश्चिकाः	पूर्वस्याम्
धनुः, मकरः, कुम्भः	दक्षिणस्याम्
मीनः, मेषः, वृषः	पश्चिमस्याम्
मिथुन-कर्क-सिंहाः	उत्तरस्याम्

1. विश्वकर्मप्रकाश अ.-7, श्लो.-2, पृ. 196
2. बृहद्वास्तुमाला- श्लो-149, पृ. 102

सिंहस्य सूर्ये सति पश्चिमद्वारनिर्माणम् अशुभं भवति। तुलायाः सूर्ये उत्तराभिमुखं द्वारमशुभं भवति। कर्कराशिगते सूर्ये पूर्वद्वारं, पश्चिमद्वारं च अशुभम्। कर्क-सिंहयोः सूर्ये सति पूर्वद्वारमशुभं भवति। तुला-वृश्चिकराशिगते सूर्ये सति पश्चिमदिङ्मुखं द्वारं सर्वथा त्याज्यम्। अन्यासु दिक्ष्वेव द्वारस्य निर्माणं करणीयम्। कर्कसिंहयो सूर्ये दक्षिणदिङ्मुखं द्वारं शुभं न भवति। मकरकुम्भयोः सूर्ये उत्तराभिमुखं द्वारम् अशुभं भवति। मिथुन-कन्या-धनु-मीनराशिषु सूर्ये द्वारस्य निर्माणं सर्वथा त्याज्यम् -

सिंहे तु पश्चिमद्वारं तुलायां चोत्तरं तथा
कर्कटे पूर्व दिग्द्वारं द्वारं पश्चिमवर्जितम्
कर्कटेऽर्के च सिंहस्थे पूर्वद्वारं न शोभनम्
तुलायां वृश्चिके चैव द्वारं पश्चिमवर्जितम्
कर्कटेऽर्के च सिंहस्थे याम्द्वारं न शोभनम्
सूर्ये मकर-कुम्भस्थे सौम्यद्वारं च निन्दितम्
नृयुक् कन्या-धनुर्मीन-संस्थितेऽर्के न कारयेत्
द्वारस्तम्भो तथा दारु संचयं च विवर्जयेत्।।[1]

वर्णानुसारं द्वारस्थापनम् -

आचार्यैः वर्णानां विभागः विप्रादीनां चतुर्षु वर्णेषु कृतः। तत्र ब्राह्मणानां पश्चिममुखं द्वारं, क्षत्रियाणामुत्तरमुखं द्वारं, वैश्यानां पूर्वमुखं, शूद्राणां च दक्षिणमुखं द्वारं शुभं भवति -

प्रत्यङ्मुखं ब्राह्मणानां, क्षत्रियाणां तथोत्तरे
वैश्यानां पूर्वदिग्द्वारं, शूद्राणां दक्षिणे शुभम्।।[2]

वर्णः	**शुभद्वारम्**
ब्राह्मणानाम्	पश्चिममुखम्
क्षत्रियाणाम्	उत्तरमुखम्
वैश्यानाम्	पूर्वमुखम्
शूद्राणाम्	दक्षिणमुखम्

राश्यनुसारं द्वारस्थापनम्-

गृहस्य मुख्यद्वारस्थापने राशिविचारः क्रियते। यथा मेष-सिंह-धनुराशीनां द्वारं उत्तरदिशि, वृष-तुला-कुम्भराशीनां द्वारं पश्चिमदिशि मिथुन-कन्या-मकरराशीनां द्वारं दक्षिणदिशि, कर्क-वृश्चिक-मीनराशीनां द्वारं पूर्वदिशि शुभफलकारकं भवति।

कर्कटो वृश्चिको मीनो ब्राह्मणः परिकीर्तितः।
मेष सिंहो धनुर्धारी राशयः क्षत्रिया स्मृताः।।

1. वि.क.प्र.-अ.-7 श्लो. 8-10, पृ. 197
2. वि.क.प्र.-अ.-7, श्लो.- 13, पृ. 198

वैश्या मृगवृषो कन्या शूद्राः शेषाः प्रकीर्तिताः।
वर्णक्रमेण पूर्वा दिग्, दक्षिणे पश्चिम तथा॥
यो यस्य राशेर्मर्त्यस्य तस्य द्वारं ततश्चरेत्।
दिशि तत् विपरीतं तु कर्तुर्नेष्टफलं भवेत्॥[1]

राशयः	**वर्णाः**	**द्वारदिक्**
मीन-कर्क-वृश्चिकाः	विप्राणाम्	पूर्वदिशि
मेषः-सिंह-धनुराशयः	क्षत्रियाणाम्	दक्षिणदिशि
वृषः-कन्या-मकराः	वैश्यानाम्	पश्चिमदिशि
मिथुन-तुला-कुम्भाः	शूद्राणाम्	उत्तरदिशि

यदि चन्द्रो धनु-मेष-सिंहराशिषु भवेत् तदा पूर्वस्यां दिशि द्वाररस्य मुखं करणीयम्। यदि च चन्द्रो मकर-वृष-कन्याराशिषु स्यात् तदा दक्षिणमुखद्वारं शुभं भवति। यदि कुम्भ-मिथुन-तुलाराशिषु चन्द्रो भवेत् तदा पश्चिमदिग्द्वारं शुभं भवति, मीन-कर्क-वृश्चिकराशिषु चन्द्रमा भवेत् तदा उदीच्यां दिशि द्वारं शुभं भवति।

धनुर्मेषसिंहे यदा राशिनाथस्तदा पूर्वभागे न्यसेद् द्वारमात्रम्।
मृगकन्यकागोषु द्वारं च याम्ये तुलायुग्मकुम्भे तथा पश्चिमास्यम्॥[2]

आयानुसारेण द्वारदिग्विचारः

आयसाधनमपि वास्तुशास्त्रस्य मूलाधारेषु अन्यतमं वर्तते। सर्वप्रथमं कस्यापि भवनस्य निर्माणात् पूर्वं पिण्डसाधनं भवति। तत्पश्चात् निर्मितस्य भवनस्यापि आयसाधनं भवति। भवनस्य दीर्घविस्तारयोः गुणनफलमष्टभिः विभज्य शेषवशाद् आयः ज्ञायते। शेषसंख्यानुसारमेव ध्वजादिक्रमेण आयानां ज्ञानं करणीयम्। तदनन्तरम् मुख्यद्वारस्य दिक्निर्धारणं कर्तव्यम्।

गृहस्य कृते सिंहगजध्वजवृषायाः शुभदायकाः भवन्ति। गजायप्रमाणेन निर्मितगृहे दक्षिणपूर्वदिशोः द्वारमुत्तमं भवति। तथा ध्वजायप्रमाणेन निर्मितगृहे दक्षिणदिशि द्वारं शुभकारकं भवति परन्तु वृषायप्रमाणेन निर्मितगृहे दक्षिणदिशि द्वारम् अशुभं भवति।

चन्द्रनक्षत्रवशाद्-द्वारस्थापनम्-

विश्वकर्मप्रकाशग्रन्थे उक्तं यत् कृतिकातः आश्लेषापर्यन्तं सप्त नक्षत्राणि पूर्वस्यां दिशि। मघातो विशाखानक्षत्रपर्यन्तं सप्तनक्षत्राणि दक्षिणस्याम्, अनुराधानक्षत्रात् श्रवणं यावत् सप्त नक्षत्राणि प्रतीच्याम्, धनिष्ठातो भरणीपर्यन्तम् सप्तनक्षत्राणि उत्तरस्यां दिशि स्थापयेत्।

---

1. वि.क.प्र.-अ.-7, श्लो.- 14-16, पृ. 198
2. वि.क.प्र.-अ.-7, श्लो.- 17, पृ. 198

चन्द्रः यस्मिन् दिङ्नक्षत्रे स्यात्तद्दिग्द्वारे द्वारस्थापनं प्रशस्यते।

कृतिकाद्यं सप्त पूर्वे मघाद्यं सप्त दक्षिणे।
मैत्राद्यं पश्चिमे ज्ञेयं धनिष्ठाद्यं सप्तोत्तरे॥
यद् दिग्भसंस्थिते चन्द्रे तद् दिग्द्वारं प्रशस्यते।
पृष्ठ-दक्षिण-वामस्थे न विदध्यात्कदाचनः॥[1]

मासानुसारेण द्वारदिग्विचारः

कस्मिन्मासे द्वारस्य स्थापनं भवेदिति विषये भणितमस्ति यत् - फाल्गुनमासे कुम्भेऽर्के, श्रावणे कर्केऽर्के सिंहस्थे च सूर्ये, पौषमासे मकरराशिगतेऽर्के च पूर्वमुखं द्वारं पश्चिममुखद्वारञ्च शुभं भवति। वैशाखमासे मेषवृषयोः सूर्ये सति तथा मार्गशीर्षमासे तुलावृश्चिकयोर्गते सूर्ये दक्षिणोत्तरमुखं द्वारं शुभं भवति।[2] त्रिषु-त्रिषु, मासेषु क्रमेण पूर्व-दक्षिण-पश्चिमोत्तर-दिक्षु राहोर्वासो भवति। तदा तस्यां दिशि मासे द्वारस्य निर्माणं न करणीयम्। द्वारनिर्माणेन अग्निभयं तथा स्तम्भनिर्माणेन च वंशनाशो भवति।

मासाः	**राहुवासदिशा**	**द्वारनिर्माणम्**
मार्गशीर्षः, पौषः, माघः	पूर्वदिशि	अशुभम्
फाल्गुनः, चैत्र, वैशाखः	दक्षिणस्याम्	अशुभम्
ज्येष्ठः, आषाढः, श्रावणः	प्रतीच्याम्	अशुभम्
भाद्रपदः, आश्विनः, कार्तिकः	उदीच्याम्	अशुभम्

त्रिषु त्रिषु च मासेषु मार्गशीर्षादिषु क्रमात्।
पूर्वदक्षिणतोयेश - पौलस्त्याशां क्रमादगुः॥

तद्दिशायां न कर्त्तव्यं द्वारं स्तम्भनिवेशनम्।
द्वारे वह्निभयं प्रोक्तं स्तम्भे वंशविनाशनम्॥[3]
कर्किनक्रहरिकुम्भगतेऽर्के पूर्वपश्चिममुखानि गृहाणि।
तौलि मेषवृषवृश्चिकयाते, दक्षिणोत्तरमुखानि च कुर्यात्॥[4]

नक्षत्रद्वारचक्रम्

द्वारस्थापनाय नक्षत्रद्वारचक्रस्य ज्ञानं करणीयम्। यथा-सूर्यनक्षत्राच्चत्वारि नक्षत्राणि द्वारस्योपरि स्थापयेत्। ततो द्वे-द्वे नक्षत्रे चतुर्षु कोणेषु, चतुष्कं शाखयोः, ततश्च त्रीणि नक्षत्राणि देहल्यां स्थापयेत्। तत् पश्चात् चत्वारि नक्षत्राणि द्वारमध्ये स्थापयेत्। यदि द्वारस्थापनदिवसस्य चन्द्रनक्षत्रं मस्तकस्य नक्षत्रेषु आगच्छति तस्मिन् स्थाने द्वारनिर्माणं

1. वि.क.प्र.-अ.-7, श्लो.- 19-20, पृ. 199
2. रत्नमाला 17/14
3. वि. क. प्र. 7/23-24
4. रत्नमालायां-अ.-17, श्लो. 14

क्रियते तदा राज्यसुखं प्राप्नोति। कोणस्य नक्षत्रेषु द्वारनिर्माणेन उच्चाटनम्, शाखानक्षत्रेषु द्वारनिर्माणेन लक्ष्मीः प्राप्यते। तथा देहल्यां नक्षत्रेषु द्वारनिर्माणेन सुखप्राप्तिः भवति।

द्वारचक्रं प्रवक्ष्यामि यथोक्तं ब्राह्मणा पुरा
सूर्यभाद् चतुष्कं तु द्वारस्योपरि विन्यसेत्
द्वे-द्वे कोणे प्रदातव्यं शाखायुग्मे चतुष्ककम्
अधश्च त्रीणि देयानि वेदा मध्ये प्रतिष्ठिताः
राज्य स्यादूर्ध्वनक्षत्रे कोणेषूद्वासनं भवेत्
शाखायां लभते लक्ष्मीं ध्वजे चैव मृतिर्भवेत्
मध्यस्थेषु भवेतसौख्यं चिन्तनीयं सदा बुधैः
द्वारचक्रमिदं प्रोक्तं द्वारनिर्माण हेतवे।।[1]

द्वारचक्रम्

सूर्यभान्नक्षत्राणि	1-4	5-12	13-20	21-23	24-27
द्वारे स्थानम्	मस्तके	कोणेषु	शाखयोः	देहल्याम्	मध्यभागे
फलम्	राज्यप्रदम्	उद्वासनम्	लक्ष्मीः	मृत्युः	सौख्यम्

तिथिवशाद् द्वारविचारः-

गृहनिर्माणार्थं पूर्णिमातः कृष्णपक्षस्याष्टमीतिथिपर्यन्तं पूर्वस्यां दिशि द्वारं, कृष्णपक्षस्य नवमीतिथितः चतुर्दशीतिथिं यावदुत्तरदिशि द्वारम्, अमावस्यातः शुक्लपक्षस्याष्टमीतिथिं यावत् पश्चिमदिशि द्वारं तथा शुक्लनवमीतिथितः चतुर्दशीतिथिं यावत् दक्षिणदिशि द्वारम् अशुभं भवति।

पूर्णेन्दुतः प्राग्वदनं नवम्यादिषूत्तरास्यं त्वथ पश्चिमास्यम्।
दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदन्ति।।[2]

द्वारस्थापनकाले यदि पञ्चमी तिथिः स्यात् तदा धनलाभः, एवमेव सप्तमी-अष्टमी-नवमी च तिथयः शुभफलप्रदाः भवन्ति। प्रतिपदातिथौ यदि द्वारस्थापनं क्रियते तदा अशुभं फलं भवति। तृतीयायां तिथौ रोगोत्पत्तिः, चतुर्थ्यां तिथौ खण्डयति। षष्ठ्यां तिथौ कुलनाशः। तथा दशम्यां तिथौ द्वारस्थापने धनहानिः भवति। अमावस्यां तिथौ परस्परं विरोधो भवति।

प्रतिपत्सु न कर्तव्यं कृते दुःखमवाप्नुयात्,
तृतीया रोगदा ज्ञेया चतुर्थी भंगकारिणी।
कुलक्षयं तथा षष्ठी दशमी धननाशिनी,
विरोधकृत्वमावस्या नास्यां शाखावरोपणम्।।[3]

1. वि.क.प्र. अ.-7, श्लो. 31-34, पृ. 202
2. मुहूर्तचिन्तामणि-वास्तुप्रकरण, श्लो-17
3. वि.क.प्र.-अ. 72, श्लो. 36-38

तिथिः	प्रतिपदा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी	अष्टमी
फलम्	दुःखम्	द्रव्यहानिः	रोगः	कार्यभंङ्गः	धनम्	कुलक्षयः	शुभम्	शुभम्
तिथिः	नवमी	दशमी	एकादशी	द्वादशी	त्रयोदशी	चतुर्दशी	पूर्णिमा	अमावस्या
फलम्	शुभम्	धननाशः	शुभम्	शुभम्	शुभम्	अशुभम्	शुभम्	विरोधः

वास्तुपदानुसारेण द्वारनिर्णयः

द्वारस्थापनाय एकाशीतिपदवास्तुमण्डले, चतुष्षष्टिः पदवास्तुमण्डले च पञ्चचत्वारिंशद्देवानां विचारः अवश्यमेव करणीयः। 81 पदवास्तुमण्डले, 64 पदवास्तुमण्डले वा स्थितदेवानां गुणधर्मितानुसारेण द्वारस्थापनं क्रियते। अस्मिन् विषये मतमस्ति यद् भूखण्डस्य नवभागं कृत्वा तदनन्तरम् दक्षिणहस्ते पञ्चभागं, वामहस्ते त्रिभागं च विहाय द्वारस्थापनं शुभफलदायकं भवति। वास्तुपदविन्यासानुसारं भल्लाटकुबेरचरकभूधरपदेषु ब्राह्मणानां कृते द्वारं शुभं भवति। गृहक्षत महेन्द्रसूर्यसत्यार्यमापदेषु क्षत्रियाणां कृते, यमवैवस्वतगन्धर्वगृहक्षतपदेषु वैश्यानां कृते, वरुणपुष्पदन्तमैत्रनैर्ऋत्यपदेषु शूद्राणां कृते द्वारं शुभं भवति।

भल्लाटे धनदे यद्वा चरके पृथिवीधरे।
ब्राह्मणस्य भवेत् वेश्म माहेन्द्रद्वारमुत्तमम्॥
माहेन्द्रेऽर्केऽथ सत्ये वा आर्यके वा निकेतनम्।
कार्यं गृहक्षतद्वारं क्षत्रियस्य शुभावहम्॥
याम्ये वैवस्वते वापि गान्धर्वेऽथ गृहक्षते।
वैश्यस्य भवनं कार्ये द्वारं पुष्पाह्वये शुभम्॥
वारुणे पौष्पदन्ते वा यद्वा मैत्रेऽथवासुर।
शूद्रस्यसदनं कार्यं भल्लाटद्वारमुत्तमम्॥[1]

अस्मिन्सन्दर्भे बृहत्संहितायां निगदितमस्ति-

नवगुणसूत्रविभक्तन्यष्टगुणेनाथवा चतुः षष्टेः।
द्वाराणियानि तेषामनलादीनां फलोपन्तयः॥
अनिलभयं स्त्रीजन्मप्रभूतधनता नरेन्द्रवाल्लभ्यम्।
क्रोधाधिकत्वमनृतं क्रोधं चौर्यं क्रमात्पूर्वे॥
अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुत वृद्धिः।
रोद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन॥

1. समराङ्गणसूत्रधारः-अ.- 39, श्लो. 2-5

सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसम्पत्।
धनसम्पत्तिनृपतिभयं धनक्षयो रोग इत्यपरे।
वधबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत्।
पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैः स्वम्॥[1]

एकाशीतिपदवास्तुनरः

ई द्वारम् (पू) आ

	शिखी	पर्जन्यः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	अन्त-रिक्षः	अनिलः	
	दितिः	आपः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	सावित्रः	पूषा	
	अदितिः	अदितिः	आप-वत्सः	अर्यमा	अर्यमा	अर्यमा	सविता	वितथः	वितथः	
	भुजगः	भुजगः	पृथिवी-धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव-श्वान्	बृहक्षतः	बृहक्षतः	
(उ)	सोमः	सोमः	पृथिवी-धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव-श्वान्	यमः	यमः	(द)
	भल्लाटः	भल्लाटः	पृथिवी-धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव-श्वान्	गन्धर्वः	गन्धर्वः	
	मुख्यः	मुख्यः	राज-यक्ष्मा	मित्रः	मित्रः	मित्रः	इन्द्रः	भृङ्गराज	भृङ्गराज	
	नागः	रुद्रः	शोषः	असुर	वरुणः	कसुमु-दन्तः	सुग्रीव	भृङ्गराज	मृगः	
	रोगः	पाप-यक्ष्मा	शोषः	असुर	वरुणः	कसुमु-दन्तः	सुग्रीव	दौवा-रिकः	पिता	

वा (प) द्वारम् नै

द्वारनिर्माणे शुभनक्षत्रम्

द्वारनिर्माणकाले अश्विनी-उत्तरात्रय-हस्त-पुष्य-श्रवण-मृगशिरा-रेवती-रोहिणीनक्षत्राणि शुभानि भवन्ति।

अश्विनी चोत्तरा हस्ततिष्यश्रुतिमृगाश्शुभाः।
स्वातौ पूष्णे च रोहिण्यां द्वारशाखावरोपणे॥[2]

---

1. वृ.संहिता- वास्तुविद्याध्यायः, अ.- 53, श्लो. 69-73
2. वि.क.प्र.- अ.7, श्लो. 35, पृ. 204

द्वारस्थापने लग्नशुद्धिः

लग्नात् यदि केन्द्रत्रिकोणेषु शुभग्रहाः भवेयुः तथा त्रिषडाय-स्थानेषु पापग्रहाः स्युः। एवं सप्तमभावे दशमभावे च कोपि ग्रहः न स्यात्तदा द्वारशाखास्थापनं करणीयम्।

उपर्युक्तविषयाः वास्तुशास्त्रस्य मानक-ग्रन्थेषु विस्तरेण वर्णिताः सन्ति। द्वारनिर्माणमेकं महत्वपूर्णं कार्यमस्ति। कस्यापि गृहस्य मुख्यस्थानं प्रवेशद्वारं भवति। प्रवेशद्वारं गृहमुखं भवति। अत एव गृहनिर्माणावसरे विधिपूर्वकं द्वारविचारः करणीयः। एतदर्थं वास्तुशास्त्रविज्ञैः सम्यक्रूपेण परामर्शं कृत्वा तदनन्तरं गृहद्वारं स्थापयेदिति।

वास्तुशास्त्र में वृक्षविन्यास

प्रो. रामचन्द्र पाण्डेय

धरा के आभूषण वृक्ष, केवल धरा की शोभा ही नहीं बढाते अपितु समस्त प्राणियों के कल्याण के साथ-साथ प्राकृतिक सन्तुलन बनाने में भी महत्वपूर्ण भूमिका निभाते हैं। समस्त जीवों में प्राण सञ्चार करने वाली वायु को शुद्ध रखने एवं आवश्यकतानुसार उसे प्रवाहित करने में वृक्षों का महत्वपूर्ण योगदान होता है। जब हम वास्तुशास्त्र के सन्दर्भ में इनकी भूमिका पर विचार करते हैं तब वहाँ भी वृक्षों की प्रबल सहभागिता सिद्ध होती है। वास्तु शब्द का सम्बन्ध निवास स्थान से है। गृह, ग्राम, नगर आदि की समग्र व्यवस्था एवं उससे सम्बन्धित गुणदोषों को निरूपित करनेवाली विद्या को वास्तुशास्त्र कहते हैं। इस दृष्टि से भी वृक्षों की उतनी ही महत्ता है जितनी भवनों की। क्योंकि वृक्ष भी पशु एवं पक्षियों के प्रत्यक्ष रूप से निवास स्थल होते हैं। अप्रत्यक्ष रूप से देखा जाय तो देव, दानव, यक्ष, मानव आदि अनेक जातियों के साथ भी इनका अटूट सम्बन्ध है। पुराणों में स्पष्ट उल्लेख है कि देव, दानव, गन्धर्व, किन्नर, सर्प, गुह्यक, पशु-पक्षी तथा मनुष्य प्रसन्नता पूर्वक वृक्षों का आश्रय ग्रहण करते हैं।

देवदानवगन्धर्वाः किन्नरोरगगुह्यकाः।
पशुपक्षिमनुष्याश्च संश्रयन्ति मुदा द्रुमान्।।[1]

अतः वृक्ष भी निवास स्थान होने से वास्तुशास्त्र के अंगभूत हैं। इसलिए वास्तुशास्त्र के अन्तर्गत वृक्षों का विमर्श अत्यावश्यक हो जाता है। मानवीय या दैवीय आलयों के लिए जिस प्रकार भूखण्ड का चयन किया जाता है तथा गुण-दोषों के आधार पर उनके शुभाशुभ होने का विचार किया जाता है, उसी प्रकार वृक्षों का भी गुणों के आधार पर चयन कर भवन में या भवन के निकट रोपित करने का विधान किया गया है। वृक्षों का परिचय देते हुए कहा गया है कि वृक्ष मूलतः वनस्पति हैं तथा इनकी तृण या वृक्ष प्रजाति कही गई है जो छः प्रकार की होती हैं- 1. वृक्ष, 2. गुल्म, 3. लता, 4. वल्ली, 5. त्वक्सार, तथा 6. तृण।

वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः।
षडेते वृक्षजातीयास्तासां रोपे फलं श्रृणु।।
यः पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान्।
सर्वसत्वोपभोगाय स याति परमां गतिम्।[2]

---

1. वह्निपुराण तडागवृक्षप्रशंसाध्याय उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
2. तत्रैव

इन सभी प्रजातियों के अपने अपने गुणधर्म हैं। तदनुसार इनकी उपयोगिता एवं महत्व बतलाये गये है। साथ ही वृक्षारोपण को पुनीत कार्य बतलाते हुए यह भी कहा गया है कि सभी प्राणियों के उपभोग हेतु छाया, पुष्प और फल को देने वाले वृक्षों का रोपण जो व्यक्ति करता है वह परम गति को प्राप्त करता है। कुछ विशेष प्रकार के वृक्षारोपण की महिमा के प्रसंग में कहा गया है कि छाया, पुष्प और फल वाले 30 वृक्ष तथा 10 आम्र वृक्ष लगाने वाला व्यक्ति नरक में नहीं जाता।

छायापुष्पोपगांस्त्रिशत् फलपुष्पद्रुमांस्तथा
रोपयित्वा दशाम्रांस्तु नरो न नरकं ब्रजेत्।।[1]

भारतीय वाङ्मय में वृक्षों को जीवन्त प्राणी की तरह वर्णित किया गया है। भगवान श्रीराम ने वृक्षों से पूछा था क्या तुमने सीता को कहीं देखा है? भगवती सीता ने भी वृक्षों और नदियों द्वारा राम को संदेश दिया कि रावण ने मेरा हरण कर लिया है।

देवतानि च यान्यस्मिन् वने विविधपादपे ।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ।।
आमन्त्रये जनस्थाने कल्णकारांश्च पुष्पितान् ।
क्षिप्रं रामाय शंसधवं सीतां हरति रावणः ।।[2]

वृक्षों का महत्वपूर्ण योगदान अन्य जीवों के साथ साथ मनुष्यों के लिए भी देखने को मिलता है। उनके क्रियाकलाप का भी वर्णन करते हुए कहा गया है कि वृक्ष भी मनुष्यों की भाँति पञ्चयज्ञ करते हैं। प्रत्येक गृहस्थ को पञ्चयज्ञ करने का निर्देश धर्मशास्त्र में दिया गया है। यद्यपि पञ्चयज्ञ सर्व विदित है किन्तु प्रसङ्ग उपस्थित होने से उनका भी उल्लेख कर देना उचित होगा।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।[3]

अध्यापन करने से ब्रह्मयज्ञ (1), तर्पण करने से पितृयज्ञ (2), हवन करने से दैवयज्ञ (3), बलि (भोजन) देने से भूतयज्ञ (4), तथा अतिथिपूजन से नृयज्ञ (5) सम्पन्न होता है।

इसी प्रकार वृक्ष भी पञ्चयज्ञ करते है। इन्धन के लिए लकड़ी देकर अग्निहोत्र, छाया से पथिकों को विश्राम, पक्षियों को घोषला बनाने हेतु स्थान देकर भूदान, फल देकर भोजन दान तथा पत्ते, पुष्प, छाल, जड़ देकर औषधि दान। इस प्रकार वृक्षों द्वारा भी पञ्च यज्ञ करने का प्रमाण मिलता है। वृक्ष भी पञ्च यज्ञ द्वारा लोक कल्याण का कार्य करते हैं तथा पितरों को तृप्त करते हैं ।

---

1. वह्निपुराण तडागवृक्षप्रशंसाध्याय उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
2. वा.रा.3.49.31-32
3. मनुस्मृति 3/70

पत्रपुष्फलच्छाया मूलवल्कलदारुभिः।
परेषामुपकुर्वन्ति तारयन्ति पितामहान्।[1]

अपि च–

इन्धनार्थं यथानीतमग्निहोत्रं तदुच्यते।
छायाविश्रामपथिकैः पक्षिणां निलयेन च।
पत्रमूलत्वगादीन्श्च औषधार्थं तु देहिनाम्।
उपकुर्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते।।[2]

इन पञ्च यज्ञों से या वृक्षों द्वारा प्रदत्त अन्य वस्तुओं से देवादि सभी प्रसन्न होते हैं। पुष्पों से देवता, फलों से पितृगण, छाया से मनुष्य, पशु, पक्षी तथा मृग आदि सभी तृप्त होते हैं।

पुष्पैः सुरगणाः सर्वे फलैश्च पितरः सदा।
छाय्या मे मनुष्यास्तु पशुपक्षिमृगास्तथा।।[3]

इस प्रकार वृक्षों की जीवन्त महत्ता का वर्णन करने के उपरान्त वृक्ष लगाने वाले व्यक्तियों को जो पुण्य प्राप्त होता है उसका भी उल्लेख करना अत्यावश्यक है। शास्त्रों के अनुसार पुष्प और फल वाले वृक्षों का जो मनुष्य रोपण करता है वह सुन्दर भवन में निवास करते हुए प्रतिष्ठित पद पर आसीन होता है। एक पीपल, एक निम्ब, एक बरगद, 10 पुष्प जाती, दो अनार, 2 नींबू तथा 5 आम का वृक्ष लगाने वाला व्यक्ति नरक का दर्शन नहीं करता है।

पुष्पोपगन्धांश्च फलोपगन्धान् यः पादपान् रोपयते मनुष्यः।
समृद्धदेशे वरवेश्मवेद्यां लभेदधिष्ठानवरं स विप्रः।[4]
अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशपुष्पजातीः।
द्वे द्वे तथा दाडिम मातुलुङ्गे पञ्चाम्ररोपी नरकं न याति।[5]

पाठान्तर– **अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश चिञ्चिणीकम्।**
कपित्थविल्वामलकत्रायञ्च पञ्चाम्रवापी नरकं न पश्येत्।[6]

कहीं-कहीं वृक्षों की तुलना पुत्रों से की गई है। जिस प्रकार एक सुपुत्र प्रयत्न पूर्वक किये गये कठोर नियमों का पालन करता हुआ अपने कुल का उद्धार करता है उसी प्रकार वृक्ष भी अपने स्वामी (रोपण कर्ता) का नरक से उद्धार करते हैं।

यथा सुपुत्रः कुलमुद्धरेद्धि यथातिकृत्स्नान्नियमप्रयत्नात्।
तथात्र वृक्षाः फलपुष्पभूताः स्वं स्वामिनं नरकादुद्धरन्ति।।[7]

---

1. वह्निपुराण तडागवृक्षप्रशंसाध्याय उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
2. वाराह पुराण गोकर्णमाहात्म्यम् उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
3. वह्निपुराण तडागवृक्षप्रशंसाध्याय उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
4. तत्रैव
5. वाराह पुराण गोकर्णमाहात्म्यम् उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476
6. बृहदवास्तुमाला वृक्षारोपाणदिविचारः श्लो. 22
7. वाराह पुराण गोकर्णमाहात्म्यम् उद्धृत शब्दकल्पद्रुम, खण्ड 4, पृ. 476

उक्त विवरणों से स्पष्ट हो जाता है कि मानव ही नही अपि तु समस्त प्रणियों की जीवनचर्या एवं वास्तु शास्त्र के साथ वृक्षों का कितना गहरा सम्बन्ध है। जब ये वास्तुशास्त्र के अंगभूत सिद्ध हैं तो वास्तु प्रसङ्ग में इनका विमर्श आवश्यक हो जाता है।

आवासीय वास्तु में वृक्षविन्यास- यद्यपि सभी प्रकार के वृक्षों की अपनी अपनी विशेषता होती है किन्तु आवास के प्रसंग में कुछ वृक्षों को शुभ तथा कुछ को अशुभ भी माना गया है। अशुभ वृक्षों का गृह वास्तु में या वास्तु समीप रोपण का निषेध भी किया गया है। कुछ वृक्षों का शुभाशुभत्व दिशाओं के अनुसार बतलाया गया है। यथा-

याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।
उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः॥[1]

अर्थात् प्लक्ष, वट, उदुम्बर तमथा अश्वत्थ वृक्ष क्रम से भवन के दक्षिण आदि दिशाओं में अशुभ तथा उत्तर आदि दिशाओं में शुभ होते हैं। आशय यह कि दक्षिण में प्लक्ष (पाकड़), पश्चिम में वट, उत्तर में उदुम्बर (गूलर) तथा पूर्व में अश्वत्थ (पीपल) अशुभ होते हैं किन्तु ये सभी विपरीत दिशाओं में शुभ माने जाते हैं। यथा- उत्तर में प्लक्ष, पूर्व में वट, दक्षिण में उदुम्बर तथा पश्चिम में पीपल शुभ होता है।

अग्निकोण में क्षीरवृक्ष (दूधवाले वृक्ष), वट, अश्वत्थ, रक्तपुष्प वाले वृक्ष, कांटेवाले वृक्ष, शाल्मली (सेमर), प्लक्ष, तथा उदुम्बर अग्निकोण में अशुभ एवं पीड़ादायक होते हैं। दक्षिण दिशा में कुछ विशिष्ट वृक्षों को छोड़कर प्रायः सभी वृक्ष अशुभ होते है। पनस (कटहल) प्रायः सर्वत्र (सभी दिशाओं में) शुभ माना गया है।

स्थान के अनुसार भी वृक्षों के शुभाशुभ का विचार किया गया है। यथा- आश्रम में नारियल शुभ, गृहस्थों के लिए सर्वत्र धनदायक, शिविर के ईशान कोण तथा पूर्व में पुत्रप्रद होता है। सामान्यतया नारिकेल सर्वत्र मनोहर एवं सुखप्रद होता है। इसी प्रकार रसाल (आम्र) वृक्ष के लिए भी कहा गया है कि यह सर्वत्र शुभद होता है फिर भी यदि पूर्व दिशा में आम्र का वृक्ष हो तो राजाओं को सम्पत्ति प्रदान करने वाला होता है। इसी प्रकार बिल्व, पनस, जम्बीर, बदरी को सर्वत्र शुभ कहा गया है तथा विशेष रूप से पूर्व दिशा में सन्तति देने वाला तथा दक्षिण में धनप्रद कहा गया है।

आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः।
शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरुः।
सर्वत्र मंगलार्हश्च तरुराजो मनोहरः॥
रसालवृक्षः पूर्वस्मिन् नृणां सम्पत्प्रदस्तथा।
शुभप्रदश्चसर्वत्र सुरकारो निशामय॥
विल्वश्च पनसश्चैव जम्बीरो वदरी तथा।
प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनदस्तथा॥[2]

---

1. बृहतसंहिता वास्तुविद्याध्याय श्लो. 83
2. ब्रह्मवैवर्तपुराण श्रीकृष्णजन्मखण्ड अध्याय 102, उद्धृत शब्दकल्पद्रुम खण्ड 4, पृ. 475-476

यहाँ सर्वत्र का अभिप्राय गृह से बाहर कहीं भी वृक्ष रोपण करने से है किन्तु गृह के अन्दर शुभ नहीं माना गया है। कहा गया है कि जिस घर में पीपल, कदम्ब,कदली और बीजपूर उग जाते हैं तथा वहीं बढने लगते हैं तो उस गृह के स्वामी का विकास अवरुद्ध हो जाता है।

अश्वत्थं च कदम्बं च कदली बीजपूरकम्।
गृहे यस्य प्ररोहन्ति स गृही न प्ररोहति।।[1]

अतः वृक्षों के रोपण में शुभाशुभ का विचार अवश्य कर लेना चाहिए। जो शुभ हों तथा कुल वृद्धि करने वाले हैं उन्हीं वृक्षों का रोपण हेतु चयन करना चाहिए। वृक्षों के प्रभाव एवं उनके परिणाम ग्रन्थों में बताये गये हैं। उदाहरणार्थ कुछ वृक्षों के नाम एवं उनके परिणाम इस प्रकार हैं–

विभीतके दासवृद्धिर्वकुलोदास्यदस्तथा।
अपत्यनाशकस्तालो वकुलः कुलवर्धनः।
बहुभार्या नारिकेली द्राक्षः सर्वाङ्गसुन्दरः।
रतिप्रदा तथा केली केतकी रूपनाशिनी।।[2]

प्लक्ष रोपण को प्रतिष्ठापरक बतलाते हुए कहा गया है–

प्रतिष्ठां ते गमिष्यन्ति ये नराः प्लक्षरोपकाः।[3]

वाटिका में वृक्ष विन्यास–

विशाल वृक्षों की वाटिका की 7 श्रेणियाँ बताई गई हैं इनमें सर्वोत्तम वाटिका आम्रवृक्षों की कही गई है। उत्तरोत्तर न्यूनता क्रम से सातों वाटिकाओं का विवरण इस प्रकार है– 1. आम्र, 2. अश्वत्थ, 3. वट, 4. प्लक्ष, 5. निम्ब, 6. जम्बु तथा 7. इमली वृक्षों की वाटिका।

यद्यपि वाटिका में सभी दिशाओं में वृक्ष लगाये जाते हैं तभी वाटिका का स्वरूप भी लक्षित होता है। तथापि कुछ विशिष्ट वृक्षों के लिए स्थान विशेष का निर्देश किया गया है। यथा–

'ईशाने रोपयेद्धात्रीं नैर्ऋत्ये चिञ्चिणी द्रुमान्।
आग्नेय्यां दाडिमं चैव वायव्ये विल्ववृक्षकम्।।
प्लक्षोत्तरे पूर्ववटं प्रशस्तं ह्युदुम्बरं दक्षिणभागके च।
अश्वत्थवृक्षं दिशि वारुणस्यां मध्यं तथाम्रान् विविधप्रकारान्।।[4]

---

1. बृहदवास्तुमाला वृक्षारोपाणदिविचारः श्लो. 21
2. प्रदमपुराण सृष्टि खण्ड वृक्षारोपण अध्याय 29, उद्धृत शब्दकल्पद्रुम खण्ड 4, पृ. 476
3. तत्रैव
4. बृहदवास्तुमाला वृक्षारोपणादिविचारः श्लो. 23–24

वाटिका के ईशान कोण में धात्री (आँवला), नैर्ऋत्य में इमली, अग्नि कोण में अनार, वायव्य कोण में विल्ववृक्ष, उत्तर में प्लक्ष, पूर्व में वट, दक्षिण में उदुम्बर, पश्चिम में पीपल तथा मध्य में विविध प्रकार के आम के वृक्षों का रोपण करना चाहिए। इसी प्रकार दक्षिण और नैर्ऋत्य में जम्बू-कदम्ब, ईशान और पूर्व में कटहल और आम प्रशस्त माने गये हैं। वाटिका से बाहर पूर्व दिशा में बाँस, उत्तर में शमी, पश्चिम में वाटिका से बाहर खदिर (खैर), दक्षिण में बाहर की ओर बकुल का रोपण शुभ माना गया है।

वृक्षरोपणविधान-

अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः।
मङ्गल्याः पूर्वमाराम रोपणीया गृहेषु वा।।[1]

किसी भी वाटिका के शुभत्व की वृद्धि के लिए सर्वप्रथम शास्त्रोक्त शुभवृक्षों का रोपण करना चाहिए। वे शुभ वृक्ष हैं 1. अरिष्ट (निम्ब), अशोक, पुन्नाग (पुष्पविशेष), शिरीष एवं प्रियंगु (मालकांगनी)। इनके रोपण के अनन्तर अन्य वृक्षों का रोपण करना चाहिए।

वृक्ष के पौधे को एक स्थान से दूसरे स्थान पर रोपण के पूर्व उन्हे संक्रमण से बचाने के लिए उनका संस्कार करना चाहिए। संस्कार विधि को बतलाते हुए आचार्य वराहमिहिर ने लिखा है-

घृतोशीरतिलक्षौद्रविडङ्गक्षीरगोमयैः।
आमूलस्कन्धलिप्तानां संक्रामणविरोपणम्।।[2]

अर्थात् घृत, खस, तिल, मधु, वायविडङ्ग, दूध और गोबर का लेप बनाकर जड से लेकर स्कन्ध सहित अग्रभाग तक पौधे पर लेप करना चाहिए। तदनन्तर उसका रोपण करने से स्वस्थ वृक्ष तैयार होता है। वृक्ष का रोपण करते समय दो पौधों के बीच अन्तराल का धयान अवश्य रखना चाहिए। अन्तराल अल्प होने पर वृक्ष बडे होकर एक दूसरे के विकास को बाधित करते हैं। इस लिए दो वृक्षों के बीच अन्तराल बतलाते हुए कहा गया है-

उत्तमं विंशतिर्हस्ता मधयमं षोडशान्तरम्।
स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्।।[3]

दो वृक्षों के मध्य बीस हाथ का अन्तराल उत्तम, षोडश हाथ का मधयम तथा बारह हाथ का अन्तराल निख्रष्ट माना गया है।

वृक्षों के रोपण के लिए उचित काल (ऋतु) का भी धयान रखना चाहिए। बीज से उत्पन्न पौधों को शिशिर ऋतु में, काण्डरोपित (कलमी) पौधों को हेमन्त ऋतु में तथा

1. बृहतसंहिता वृक्षायुर्वेदाध्याय श्लो. 3
2. बृहतसंहिता वृक्षायुर्वेदाध्याय श्लो. 7
3. तत्रैव श्लो. 12

विशाल शाखाओं वाले वृक्षों का वर्षा ऋतु में उचित दिशाओं में रोपण करना चाहिए।

अजातशाखान् शिशरे जातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथादिक्स्थान् रोपयेत्।।[1]

शास्त्रोक्त विधि से रोपण करने के उपरान्त पौधों के समुचित विकास के लिए समय पर लसचन करना चाहिए। सिंचन के लिए आवश्यक अन्तराल शास्त्रकारों ने दिये हैं–

सायं प्रातश्च घर्मर्तौ शीतकाले दिनान्तरे।
वर्षासु भुवः शोषे सेक्तव्या रोपिता द्रुमाः।।[2]

ग्रीष्मकाल में सायं, प्रातः, शीतकाल में एक दिन के अन्तराल पर तथा वर्षा ऋतु में जब भूमि शुष्क हो जाय तब सिञ्चन करना चाहिये।

इन विधियों का अनुसरण करते हुए वृक्षों का रोपण करने से वृक्ष स्वस्थ एवं शुभद होते हैं। यद्यपि वृक्षों के अनेक नियम हैं किन्तु प्रस्तुत निबन्ध में कुछ आवश्यक बिन्दुओं का ही स्पर्श करने का प्रयास किया गया है। ताकि अति संक्षेप में वृक्ष विन्यास की विधि शास्त्रोक्त प्रकार से प्रस्तुत की जा सके।

1. तत्रैव श्लो. 6
2. तत्रैव श्लो. 9

वास्तु-मुहूर्त विमर्श

- प्रो. ओंकारनाथ चतुर्वेदी

वसन्त्यस्मिन् इति वास्तु अर्थात् जिस भूमि अथवा भवन में निवास करने वाले लोगों को समुचित सुरक्षा, सुविधा एवं प्राकृतिक शक्तियों तथा पंचमहाभूतों के सामंजस्य से स्वास्थ्य लाभ मिलता रहे, उस भवन को ''वास्तु'' कहा जाता है। वास्तु सम्बन्धी नियमादि का वर्णन जिस शास्त्र में मिलता हो उसको ''वास्तुशास्त्र'' कहते हैं। ऋषियों, मनीषियों, आचार्यों ने सतत मनन-चिन्तन तथा अनुभवों के आधार पर इस शास्त्र को समृद्धशाली बनाया है। यद्यपि यह शास्त्र बहुत विस्तृत है, तथापि वास्तुशास्त्र के अन्तर्गत भूमि एवं भवन के विधिसम्मत निर्माण में जिन कारकों का समावेश होता है, उसे ''गृहवास्तु'' कहा जा सकता है। गृहवास्तु के आधार पर भवन निर्माण में क्रमिक रूप से जो कार्य सम्पन्न किए जाते हैं उनमें भूमि पूजन से प्रारम्भ कर गृह प्रवेश पर्यन्त तक के सभी कृत्यों का वर्णन शास्त्रों में प्राप्त होता है।

प्रत्येक कार्य को सम्पन्न करने में ''काल'' का विशेष महत्त्व होता है। यदि उचित समय पर बीजारोपण किया जाए, तो कृषि भी उन्नत एवं पैदावार अधिक होती है। समय पर बीजारोपण न करने पर पैदावार भी न्यूनतम होने की सम्भावना रहती है। अतः भवन निर्माण भी समय सापेक्ष अनिवार्य माना जाता है। यदि शुभ समय पर भवन निर्माण की प्रक्रिया प्रारम्भ की जाए तो भवन का निर्माण निर्विघ्न समाप्त होगा, अशुभ समय में प्रारम्भ प्रक्रिया से पग-पग पर विघ्न-बाधाओं के चलते भवन निर्माण की सम्भावना क्षीण एवं सन्देहास्पद ही रहेगी। ज्योतिष एवं वास्तुशास्त्र के अनुसार शुभ-समय का चयन करना ही ''मुहूर्त'' कहलाता है। मुहूर्त पंचांग शुद्धि एवं लग्नादि के आधार पर निश्चित होता है। कार्य की प्रवृत्ति, देश-काल का सम्यक् बोध करके ही, पूर्वाचार्यों ने मुहूर्तों के लिए शास्त्रों में निर्देश दिए हैं। ''गृहवास्तु'' में भूमि पूजन से प्रारम्भ कर गृह-प्रवेश पर्यन्त तक के विविध कृत्यों में ''मुहूर्तों'' का महत्वपूर्ण स्थान है।

भूमि पूजन मुहूर्त विचार

गृहारम्भ में सर्वप्रथम भूमि पूजन होता है। बाद में शिलान्यास किया जाता है। कुछ लोग भ्रान्तिवश भूमि पूजन एवं शिलान्यास को एक ही कार्य मान लेते हैं और दोनों

कार्य एक साथ ही सम्पन्न करते एवं कराते हैं। भूमि पूजन में शिलान्यास से पूर्व नींव के लिए खुदाई का कार्य होता है। शिलान्यास में नींव में प्रथम शिला स्थापित करके भवन की नींव भरी जाती है।

भूमि पूजन हेतु मुहूर्त के लिए मास शुद्धि, पक्ष शुद्धि, पंचांग शुद्धि एवं लग्न का विचार विशेष रूप से किया जाता है किन्तु इन सब के विचार करने के पूर्व भूमि की शयनावस्था का विचार करना चाहिए। भूमि शयन में भूमि पूजन न करके जाग्रत भूमि में ही भूमि पूजन करना श्रेयस्कर होता है। यथा –

प्रद्योतनात्पंचनगांकसूर्यनवेन्दुषड्विंशतिमितेषु भेषु।
शेते मही नैव गृहं विधेयं तडागवापी खननं न शस्तम्।।[1]

अर्थात् सूर्य नक्षत्र से चन्द्र नक्षत्र तक (जिस दिन भूमि–पूजन अभीष्ट हो) 5, 7, 9, 12, 19 एवं 26वाँ नक्षत्र हो तो, भूमि खनन अर्थात् नींव खोदने का कार्य नहीं करना चाहिए।

मतान्तर से सूर्य संक्रान्ति के दिन से 5, 7, 9, 11, 15, 20, 22, 23 एवं 28वें दिन भूमि शयन होता है। इसको विचार कर ही भूमि पूजन का मुहूर्त निश्चय करें। अन्य विचारणीय विषय निम्न प्रकार हैं –

1. गुरु–शुक्र तथा चन्द्रमा के अस्त होने पर भूमि पूजन नहीं होता।
2. रविवार एवं मंगलवार भूमि खनन में वर्जित हैं।
3. रिक्ता (4, 7, 9, 14) एवं अमावस्या तिथि त्याज्य हैं।

प्रशस्त मास – वैशाख, श्रावण, मार्गशीर्ष, पौष एवं फाल्गुन मास द्वारदिक्परक से ग्राह्य हैं। इनमें चान्द्र एवं सौरमासों का ग्रहण किया गया है। स्पष्टार्थ चक्र –[2]

मास (चान्द्र)	**सूर्यराशि**	**द्वारदिशा**
वैशाख	मेष, वृष	उत्तर–दक्षिण
श्रावण	कर्क, सिंह	पूर्व–पश्चिम
मार्गशीर्ष	तुला, वृश्चिक	उत्तर–दक्षिण
फैख	मकर	पूर्व–पश्चिम
फाल्गुन	कुम्भ	पूर्व–पश्चिम

मतान्तर से कार्तिक एवं माघ मास भी ग्राह्य हैं। शुभ मुहूर्त में यथोपलब्धोपचार से भूमि पूजन कर यथाशक्ति ग्रहों एवं वास्तु देवताओं का भी पूजन स्मरण करके नींव खनन का कार्य प्रारम्भ करना चाहिए।

---

1. बृहद्वास्तुमाला प्रयोग मिश्रप्रकरण श्लोक 96
2. मुहूर्तचिन्तामणि वास्तुप्रकरण श्लोक 15

नींव खनन का कार्य विदिशाओं से ही प्रारम्भ किया जाता है। मुख्य दिशा अर्थात् पूर्व-पश्चिम-उत्तर एवं दक्षिण दिशाओं में खनन प्रारम्भ नहीं होता है। राहु मुख का विचार करके विविध कार्यों में कोण दिशा से खनन प्रारम्भ किया जाता है। राहु मुख का ज्ञान करके पृष्ठविदिशा में नींव खनन का कार्य प्रारम्भ करके चारों तरफ खनन-कार्य सम्पन्न करना चाहिए। यथा -

देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः।
मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक् शुभा भवेत्॥[1]

खातदिक् ज्ञापक चक्र (राहु मुख - पृष्ठ चक्र)

कार्य	**राहु मुख दिशा (ईशान)**	**राहु मुख दिशा वायव्य**	**राहु मुख दिशा नैर्ऋत्य कोण**	**राहु मुख दिशा अग्निकोण**
देवालय	12, 1, 2 राशि के सूर्य में	3, 4, 5 राशि के सूर्य में	6, 7, 8 राशि के सूर्य में	9, 10, 11 राशि के सूर्य में
गृहारम्भ	5, 6, 7 राशि के सूर्य में	8, 9, 10 राशि के सूर्य में	11, 12, 1 राशि के सूर्य में	2, 3, 4 राशि के सूर्य में
जलाशय	10, 11, 12 राशि के सूर्य में	1, 2, 3 राशि के सूर्य में	4, 5, 6 राशि के सूर्य में	7, 8, 9 राशि के सूर्य में
खनन दिशा	अग्निकोण	ईशान	वायव्य	नैर्ऋत्य

अभीष्ट कोण से प्रारम्भ करके दक्षिणावर्तीक्रम से नींव का खनन करना उचित होता है।

शिलान्यास (गृहारम्भ) मुहूर्त -

नींव खनन हो जाने के पश्चात् नींव को भरने का कार्य प्रारम्भ होता है। प्रारम्भिक ईंट अथवा पत्थर की प्रथम शिला रखने को ही शिलान्यास कहते हैं। तत्पश्चात् गृह निर्माण करने की प्रक्रिया प्रारम्भ हो जाती है। फिर निरन्तर कार्य चालू रखना ही उचित होता है। शिलान्यास (प्रथम इष्टिका न्यास) सर्वदा अग्निकोण में ही करना चाहिए। खात (खनन) का प्रारम्भ तो किसी विदिशा (कोण) में हो सकता है, किन्तु शिलान्यास सदैव अग्निकोण में ही किए जाने का बहुसम्मत मत शास्त्रों में उपलब्ध होता है। यथा -

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमम्।
शेषाः प्रदक्षिणेन स्तम्भाश्च प्रतिस्थाप्या॥[2]

तथा शारंगधरः -

1. मुहूर्तचिन्तामणि वास्तुप्रकरण श्लोक 19
2. बृहद्वास्तुमालाप्रयोग मिश्रप्रकरण श्लोक 123

प्रासादेषु हर्म्येषु गृहेष्वन्येषु सर्वदा।
आग्नेय्यां प्रथमं स्थापयेत्तद्विधानतः॥[1]

कश्यप ऋषि का मत –

सूत्रभित्तिशिलान्यासं स्तम्भस्यारोपणं तथा।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह कश्यपः॥[2]

अग्निकोण में शिलान्यास करके ताम्र कलश की स्थापना करनी चाहिए। ताम्रपाय (कलश) में तीर्थों की मिट्टी, ईंट, स्वर्ण, पंचरत्न, सप्तधान्य, शैवाल (काई) रख कर अग्निकोण में खुदे हुए गड्ढे में स्थापित करना अभीष्ट होता है। वह भवन निर्माण के समय का खातपात्र होता है। यथा –

मृदिष्टिका स्वर्णरत्नधान्यशैवालसंयुतम्।
ताम्रपात्रस्थितं सर्वं खातमध्ये नियोजयेत्॥[3]

गृहारम्भ में मास विचार – गृहारम्भ में वैशाख, श्रावण, मार्गशीर्ष एवं फाल्गुन ये चार माह श्रेष्ठ हैं, मकर के सूर्य होने पर पौष मास में भी गृहारम्भ किया जा सकता है। मतान्तर से कार्तिक मास भी ग्राह्य है। वृद्ध नारद के मतानुसार विष्णु के जाग्रतावस्था के मासों में ही गृहारम्भ करना चाहिए।

तिथि – शुक्ल पक्ष की 2, 3, 5, 6, 10, 11, 12 तथा 15 (पूर्णिमा) तिथियाँ शुभ हैं। मतान्तर से सप्तमी तिथि भी ग्राह्य है। कुछ विद्वानों के अनुसार कृष्ण पक्ष की 2, 3, 5 तिथियाँ भी प्रशस्त हैं।

वार – सोम, बुध, गुरु, शुक्र एवं शनिवार शुभ हैं।

शुभ नक्षत्र – रोहिणी, मृगशीर्ष, हस्त, चिचा, स्वाति, अनुराधा, तीनों उत्तरा, धनिष्ठा, शतभिषा एवं रेवती[4] नक्षत्र प्रशस्त माने गए हैं। मतान्तर से पुनर्वसु तथा पुष्य भी ग्राह्य हैं।[5]

उपर्युक्त शुभ नक्षत्रों में वृषवास्तुचक्र के अनुसार लाभप्रद होने पर ही गृहारम्भ करना उचित होता है, अन्यथा नहीं।

---

1. बृहद्वास्तुमालाप्रयोग मिश्रप्रकरण श्लोक 124
2. बृहद्वास्तुमालाप्रयोग मिश्रप्रकरण श्लोक 125
3. बृहद्वास्तुमालाप्रयोग मिश्रप्रकरण श्लोक 142
4. बृहद्वास्तुमालाप्रयोग गणनाप्रकरण श्लोक 65
5. मुहूर्त विज्ञान – प्रो. शुकदेव चतुर्वेदी पृष्ठ 129

वृषवास्तु चक्र

सूर्यनक्षत्र से चन्द्र

नक्षत्र सं.		**वत्स (वृष) का स्थान**	**गृहारम्भ करने पर फल**
3	अशुभ	शिर	अग्नि भय
4	अशुभ	अग्रिम पाद	शून्य (रिक्त-अशुभ)
4	शुभ	पीछे के पाद	स्थिरता
3	शुभ	पीठ	लक्ष्मी प्राप्ति
4	शुभ	दक्षिण कुक्षि (कोख)	लाभ
3	अशुभ	पुच्छ (पूंछ)	स्वामी नाश
4	अशुभ	वाम कुक्षि (कोख)	निर्धनता
3	अशुभ	मुख	पीड़ा

वृषवास्तु चक्र में अभिजित नक्षत्र सहित 28 नक्षत्रों की गणना की जाती है।[1]

गेहारम्भ में प्रशस्त नक्षत्रों में से जिस चान्द्र नक्षत्र में मुहूर्त अभीष्ट हो, उस नक्षत्र का वृषवास्तु चक्र में अवलोकन करने के ही बाद मुहूर्त का निश्चय करना चाहिए। सूर्य जिस नक्षत्र में चल रहा हो उस नक्षत्र से अभीष्ट नक्षत्र की गणना करें, वह नक्षत्र वृषवास्तु चक्र में शुभ फलदायक हो, तभी उस नक्षत्र में गेहारम्भ-मुहूर्त करना चाहिए, अन्यथा नहीं। सारांश में वृषवास्तु चक्र में सूर्य नक्षत्र से 7 नक्षत्र अशुभ तथा बाद के 11 नक्षत्र शुभ, अन्तिम 10 नक्षत्र अशुभ फल देने वाले होते हैं। अतः सम्यक् रूप से विचार करके ही मुहूर्त का निश्चय किया जाए।

लग्न शुद्धि - भवन की स्थिरता के लिए स्थिर लग्न विशेष शुभ माने गए है। द्विस्वभाव लग्न भी ग्राह्य है। लग्न से छठें एवं आठवें भाव में शुभ ग्रह न हों, अन्य भावों में हों, तृतीय, षष्ठ एवं एकादश भाव में पाप ग्रहों की स्थिति होने पर लग्न शुद्धि होती है। बृहद्वास्तुमाला प्रयोग ग्रन्थ में लग्न शुद्धि इस प्रकार है - शुभ ग्रहों से युक्त अथवा इष्ट स्थिर या द्विस्वभाव लग्न में वास्तुकर्म (गृहारम्भ) शुभ होता है। लग्न से केन्द्र अथवा त्रिकोण स्थान में शुभ ग्रह तथा त्रिषडाय स्थानों में पाप ग्रहों की स्थिति को शुभ माना गया है। अष्टम स्थान में यदि क्रूर ग्रह हो तो, गृहकर्ता की मृत्यु हो जाती है। श्रीपति का कथन भी इसी प्रकार प्राप्त होता है।[2]

रामदैवज्ञ ने मुहूर्त चिन्तामणि वास्तु प्रकरण में पंचांग शुद्धि एवं लग्न शुद्धि के विषय में लिखा है -

---

1. मुहूर्त चिन्तामणि वास्तुप्रकरण श्लोक 14
2. बृहद्वास्तुमाला गणनाप्रकरण श्लोक 73

भौमार्करिक्तामाद्यूने चरोनगे विपंचके।
व्यष्टान्त्यस्थैः शुभैर्गेहारम्भस्त्र्यायारिगैः खलैः।।[1]

अर्थात् मंगलवार, रविवार, रिक्ता तिथि (4, 9, 14), अमावस्या, सप्तमी, चर लग्न (1, 4, 7, 10 लग्न) एवं पंचक को त्याग दें। विपंचके का अर्थ कुछ लोग पंचक के नक्षत्र को छोड़कर ऐसा करते हैं, किन्तु, धनिष्ठा, शतभिषा का गृहवास्तु में उल्लेख होने से यह अर्थ उचित नहीं, कुछ विद्वान बाण पंचक ग्रहण करते हैं, वह भी उचित नहीं, अतः पांचवी राशि सिंह राशि के सूर्य को छोड़कर, अर्थ ग्रहण करना उचित प्रतीत होता है। इनको त्याग कर लग्न से 12 एवं 8 स्थान के अतिरिक्त स्थानों में शभ ग्रहों की स्थिति तथा 3, 6, 11 स्थानों में पाप ग्रहों के रहने पर स्थिर (वृष, सिंह, वृश्चिक, कुम्भ) एवं द्विस्वभाव (मिथुन, कन्या, धनु, मीन) लग्नों में वास्तु अर्थात् गेहारम्भ शुभ माना है।

त्याज्य – गुरु-शुक्र के अस्त एवं बाल-वृद्धत्व के दिनों में गृहारम्भ नहीं किया जा सकता है।

द्वार स्थापन मुहूर्त – भवन निर्माण के समय द्वार स्थापना के समय भी मुहूर्त विचार किया जाता है। द्वार चक्र की शुद्धि देखना अभीष्ट होता है। अतः निम्नलिखित द्वार चक्र के आधार पर नक्षत्र शुद्धि के उपरान्त ही मुहूर्त विचारणीय होता है –

द्वार चक्र

स्थान	शिर	कोण	शाखा	देहली	मध्य
सूर्य नक्षत्र से चन्द्र नक्षत्र तक संख्या	4	8	8	3	4
फल	लक्ष्मीपति	उद्वास	सौख्य	मृत्यु	सौख्य

उपर्युक्त चक्रानुसार नक्षत्र शुद्धि विचार कर निम्न नक्षत्रों में द्वार की स्थापना करना शुभ होता है। अश्विनी, तीनों उत्तरा, स्वाति, रेवती, रोहिणी नक्षत्रों में द्वार स्थापना शुभ होती है।[2] मतान्तर से मृगशीर्ष, पुष्य, हस्त एवं श्रवण नक्षत्र भी द्वार स्थापना में ग्राह्य हैं।[3]

शुभ-वार[4] – द्वार स्थापना में बुध, गुरु, शुक्र एवं सोमवार शुभ माने गए हैं। मतान्तर से रविवार भी ग्राह्य है।

---

1. मुहूर्त चिन्तामणि वास्तु प्रकरण श्लोक 18
2. मुहूर्त चिन्तामणि वास्तु प्रकरण श्लोक 29
3. बृहद्वास्तुमाला प्रयोग गणनाप्रकरण श्लोक 165 टीका
4. तत्रैव 168

शुभ तिथि[1] - बृहद्वास्तुमाला प्रयोग में 5, 7, 8 एवं 9 तिथियाँ शुभ मानी गई हैं तथा 1, 2, 3, 4, 6, 10, 15 एवं 30 तिथियाँ अशुभ मानी गई हैं। किन्तु मतान्तर से मुहूर्त मुक्तावलि में नन्दा (1, 6, 11), पूर्णा (5, 10, 15) एवं जया (3, 8, 13) तिथियों में द्वार स्थापना शुभ बतलाया गया है।

शुभ लग्न - स्थिर लग्न अर्थात् वृष, सिंह, वृश्चिक एवं कुम्भ लग्न में ही द्वार स्थापना करना शुभ होता है।[2]

वृक्षारोपण मुहूर्त -

वृक्षारोपण समय -

अजातशाखान् शिशिरे जातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथादिक्स्थान् रोपयेत्।।[3]

अजातशाखा (जिन वृक्षों में शाखा न निकली हों, अर्थात् बीज या लघु पौधे) पादपों को शिशिर ऋतु (माघ-फाल्गुन) में शाखा युक्त वृक्षों को हेमन्त ऋतु (मार्गशीर्ष-पौष) बड़ी शाखा (टहनी) वाले वृक्षों को वर्षा ऋतु (श्रावण, भाद्रपद) में रोपना चाहिए। इन वृक्षों को यथादिक् अर्थात् पूर्व-दक्षिण, पश्चिम-उत्तर दिशाओं में क्रम से लगाना चाहिए।

वृक्षारोपण नक्षत्र -

ध्रुव-मृदु-मूल-विशाखा-गुरुभं श्रवणस्तथाश्विनी हस्तः।
उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि।।[4]

अर्थात् दिव्य दृष्टि रखने वाले ऋषियों ने ध्रुवसंज्ञक नक्षत्र (तीनों उत्तरा, रोहिणी) मृदुसंज्ञक (मृग शीर्ष, रेवती, चित्रा, अनुराधा) मूल, विशाखा एवं पुष्य, श्रवण, अश्विनी तथा हस्त नक्षत्रों में वृक्षारोपण के लिए प्रशस्त नक्षत्र कहे हैं।

सामान्य रूप से वृक्षारोपण के समय शुक्र का बलवान होना आवश्यक माना गया है।

शुभवार - सोम, बुध, गुरु एवं शुक्रवार

जलचर राशियों में चन्द्रमा अर्थात् कर्क, मकर, मीन राशि के चन्द्रमा होने पर वृक्ष लगाना शुभ माना गया है।

---

1. तत्रैव 166-168
2. बृहद्वास्तुमाला प्रयोग श्लोक 169
3. बृहद्वास्तुमाला प्रयोग वृक्षायुर्वेद श्लोक 6
4. बृहद्वास्तुमाला प्रयोग वृक्षायुर्वेदाधयाय श्लोक 34

बृहस्पति के मतानुसार मूलनक्षत्र से युक्त सोमवार के दिन धनु लग्न में अथवा रेवती युक्त गुरुवार को धनु या मीन लग्न में वृक्षारोपण प्रशस्त होता है।[1]

गृह-प्रवेश मुहूर्त

गृह प्रवेश शास्त्रों में तीन प्रकार का बतलाया गया है - 1. अपूर्व, 2. सपूर्व, 3. द्वन्द्व। नव निर्मित भवन में निवास हेतु प्रथम बार प्रवेश करने को अपूर्व प्रवेश कहा जाता है। अधिक दिनों से बन्द अथवा लम्बी यात्रा के बाद जिस मकान में प्रवेश किया जाए उसको सपूर्व प्रवेश की संज्ञा दी गई है। अग्नि आदि उत्पात से अथवा जीर्ण होने पर पुनः मरम्मत कराकर प्रवेश किया जाए, उसे द्वन्द्व प्रवेश बतलाया गया है।[2] नूतन गृह प्रवेश दिन अथवा रात्रि में किसी भी समय शुभ माना गया है, सपूर्व एवं द्वन्द्व प्रवेश को दिन में विशेष प्रशस्त माना जाता है।[3]

त्याज्य - गुरु-शुक्र के अस्त एवं अधिकमास क्षयमास, गुरु एवं शुक्र के अतिचारी या नीच राशि में जाने पर, तेरह दिन का पक्ष होने पर भी गृह प्रवेश वर्जित है। होलिका दाह से पूर्व आठ दिनों (होलाष्टक) में भी गृह प्रवेश शुभ नहीं होता है। जिन नक्षत्रों में पापग्रह (सूर्य, मंगल, शनि) स्थित हों एवं जो नक्षत्र पापविद्ध हों, वे नक्षत्र भी तीनों गृह प्रवेश में त्याज्य हैं।[4]

ग्राह्य मास - नारदीय वचनानुसार तीनों प्रकार के गृह प्रवेश केवल उत्तरायण सूर्य में ही करने चाहिए।[5] माघ, फाल्गुन, वैशाख एवं ज्येष्ठ मास ही गृह प्रवेश में प्रशस्त (शुभ) माने गए हैं। कार्तिक एवं मार्गशीर्ष मास मध्यम माने गए हैं।[6]

वशिष्ठ के मतानुसार माघ मास में नूतन गृह प्रवेश में धनलाभ तथा फाल्गुन मास में निश्चित ही पुत्रलाभ एवं धनलाभ भी होता है। वैशाख में प्रथम प्रवेश करने से सभी प्रकार का अर्थात् धन-धान्य, पशु एवं पुत्र का लाभ होता है। हर्म्य अर्थात् ईंट, पत्थर आदि से निर्मित पक्के मकानों में उत्तरायण सूर्य (माघ, फाल्गुन, वैशाख, ज्येष्ठ, चैत्र को त्याग कर) में ही गृहारम्भ में प्रशस्त नक्षत्रवार आदि में गृह प्रवेश करना चाहिए। घास-फूंस से निर्मित मकानों में किसी भी समय प्रवेश किया जा सकता है।[7]

---

1. बृहद्वास्तुमाला वृक्षारोपणादिविचार श्लोक 42
2. बृहद्वास्तुमाला प्रयोग गृहप्रवेशप्रकरण श्लोक 1
3. तत्रैव श्लोक 2
4. तत्रैव श्लोक 6 का पूर्वार्ध।
5. तत्रैव श्लोक सं. 3
6. तत्रैव श्लोक सं. 4
7. तत्रैव श्लोक सं. 5

पक्ष एवं तिथि - शुक्ल पक्ष में रिक्ता - (4, 9, 15) तिथियों एवं अमावस्या को छोड़कर सभी तिथियों (1, 2, 3, 5, 6, 7, 8, 10, 11, 12, 13, 15) में प्रवेश शुभ होता है।

वार - चन्द्र, बुध, गुरु एवं शुक्रवार श्रेष्ठ होते हैं। मतान्तर से शनिवार भी ग्राह्य है।

